GSL



லிங்கங்களுக்கு சிரோவர்த்தனம் சொல்லப்படுகிறது. (90)

குடைப்புரம்போலேயாதல் திரபுஷம்போலேயாயிருக்குதல் கோழிமுட்டைபோலே இருக்குதல் அர்த்தசந்திரனைப்போலே இருக்குதல் நீரில் குமிழிபோலே இருக்குதல் ஆக சிரோ வர்த்தனம் அஞ்சுபடி சொல்லப்பட்டது. (91)

லிங்கங்களினுடைய விஸ்தாரத்தை பதினறம்சம் செய்து ஓரம்சம் இரண்டம்சம் மூன்றம்சம் நாலம்சம் சிரஸ்ஸின் கீழே இரண்டு பார்சுவத்திலும் நாற்றிச் சாய்ப்பான். ஆக சத்ராகாரமான சிரோ வர்த்தனம் நாலுபடி சொல்லப்பட்டது. (92½)

ஸர்வதோபத்ரலிங்கத்துக்கு ஓரம்சமும் இரண்டம்சமும் கொள்வான். சிவாதிகலிங்கத்துக்கு மூன்றம்சம் கொள்ளுவான். வர்த்தமானலிங்கத்துக்கு நாலம்சம் கொள்ளுவான் என்று சொல்லப்பட்டது. (93½)

இந்தக்கிரமம் அன்றிக்கே இந்தஅம்சங்கள் ஒன்றுக்கொன்று கலசுமாமாகில் அந்த சிரோவர்த்தனம் கர்த்தாவுக்குப் பொல்லாங்கைக் கொடுக்குமென்று சொல்லப்பட்டது. (94)

குக்குடாண்டமான சிரோவர்த்தனத்தை உயரத்தில் பார்த்துக் கொள்ளுவானென்று அர்த்த சந்திரமான சிரோ வர்த்தனத்தை மூன்றத்தொன்று கொள்ளுவானென்று சொல்லப்பட்டது. (94½)

நீர்க் குமிழிபோலே இருக்கும் சிரோவர்த்தனத்துக்கு லிங்கவிஸ்தாரத்தை எட்டம்சம் செய்து மூன்றரை அம்சம் கொள்ளுவானென்று சொல்லப்பட்டது. (95)

இந்த சிரோவர்த்தனத்தை மூன்று லிங்கங்களுக்கும் ஸாமான்யமென்று சொல்லப்பட்டது. (95½)

சிரோவர்த்தனும்சத்தில் மூன்றிலொன்று லிங்கோத்ஸேதத்தில் ஏற்றிக்கொள்ளுவான். லிங்காயாமத்தில் கூடினதிலும் ஆறுபாகம் கூடினதிலும் ஏறட்டுக் கட்டுவான். ஓரம்சம் இரண்டம்சம் மூன்றம்சம் எல்லா லிங்கத்துக்கும் கிரமத்தாலே சொல்லப்பட்டது. அதமலிங்கங்களுக்கும் மத்யமலிங்கத்துக்கும் உத்தமலிங்கத்துக்கும் சிரோமான மேற்றிக்கொள்ளும்படி அடவே சொல்லப்பட்டது. (97½)

லிங்கங்களுடைய சிரோவர்த்தணமாகச் சொன்ன அம்சத்தை பார்ச்வங்கள் இரண்டிலும் கீழே நாத்தி அவிடமிரண்டும் மீனாக வீசி மீனங்களுடைய முகத்திலும் வாலிலும் புறப்பட்ட நூல் இரண்டுகளிலே கூட்டி மூன்று பிந்துவாம். அவ்வளவிலே சிரோவர்த்தனத்தை சயிப்பானென்று சிவனாலே சொல்லப்பட்டது. (98½)

(मयमते त्रयस्त्रिंशाध्याये ॥)

कुर्वीत त्रपुषीफलाग्रसदृशं छत्रोपमं मस्तकं

बालेन्द्वाकृतिकुक्कुटाण्डसदृशं विप्रादिवर्णक्रमात् ।

भेदास्सर्वसमांशकप्रभृतयो नाहप्रभेदान्विताः

तेष्वेते क्रमतः स्यु. . . . . . .तदनुलोमाङ्गीकृतिश्चेष्यते ॥

विस्तारं शिवलिङ्गमूर्ध्नि वसुनन्दादित्यरुद्रांशकं

कृत्वा तत्क्रमतो विशोध्य परितो ह्येकद्विलोकांशकान् ।

GSL



कृत्वात्यष्टितिथिप्रकृत्यतिधृतिख्यातांशयुक्तं क्रमात्
पूजाभागमिहोक्तभागमुपरिष्टाच्छोधयेद्वर्णिषु ॥

तन्मस्तके नवविभागतया विभक्ते
भागं विशोध्य परितश्शिवभागदैर्घ्यम् ।

द्वात्रिंशदंशकतया परिकल्प्य भागा-
नेकैकशो द्विजमुखेषु विशोधयेद्वा ॥

छत्राभं त्रपुषाकारं कुक्कुटाण्डनिभं तथा ।
अर्धेन्दुसदृशं चाथ बुद्बुदाभं तु पञ्चमम् ॥

सर्वेषामपि लिङ्गानां शिरसो वर्तनक्रमम् ।
लिङ्गव्यासात् षोडशांशमेकद्वित्रियवाधिकम् ॥

आरोप्येकेध[१]स्संलम्ब्य लिङ्गस्योभयपार्श्वयोः ।
वर्तयन्तत्र चत्वारि च्छत्राभानि भवन्ति हि ॥

प्रथमं च द्वितीयं च समलिङ्गं नियोजयेत् ।
शिवाधिके तृतीयं तु चतुर्थं वर्धमानके ॥

वर्तनं सङ्करं नैव कुर्यात्तदशुभं यतः ।
षडंशे लिङ्गविस्तारे सार्धत्र्यंशेन वर्तयेत् ॥

---

१ 'आरोप्य चाधः' इति स्यात् ।

GSL



त्रपुषाभशिरस्सिद्ध्यै रामांशैः कुक्कुटाण्डकम् ।
लिङ्गव्यासतृतीयांशवर्धनादर्धचन्द्रकम् ॥

लिङ्गव्यासेऽष्टधा भक्ते सार्धांशत्रयवर्धनात् ।
बुद्बुदाभस्य लिङ्गस्य शिरस्सिध्यति शोभनम् ॥

लिङ्गानां शिरसीप्सितांशमुभयोस्संलम्ब्य तत्पार्श्वयोः
कृत्वा मत्स्ययुगं तदास्यजघनान्निष्क्रान्तसूत्रद्वयोः ।
तस्माद्यत्र च संयुतिर्मतिमता बिन्दुत्रयाढ्यं यथा
तत्त[व]र्तयितव्यमत्र बहुधा सोपाय ईशोदितम् ॥

(शिल्परत्ने एकोनत्रिंशाध्याये ॥)

शिरोवर्तनभागे तु चतुर्थे वा षडंशके ॥
एकं द्वयं त्रयं दद्याद् ब्रह्मभागात्क्रमेण तु ।
शिरोवर्तनभागस्य त्र्यंशं पूजांशकोपरि ॥
लिङ्गायामेऽथवारोप्य षड्भागे तु तदुच्छ्रये ।
एकांशं योजयेद्धीमान् लिङ्गे द्व्यंशं तु मध्यमे ॥
त्रिभागमुत्तमे लिङ्गे योजयेद्वा द्विजोत्तमाः !।
केवलं वा शिरोमानमधिरोप्य विवर्तयेत् ॥
शिरसा मिश्रितं भागं पार्श्वयोरवलम्ब्य च ।
वृत्तद्वयं तु तन्मानादुभयोः पार्श्वयोर्नयेत् ॥

GL



ऊर्ध्वदेशे शिरोमध्ये तृतीयं मण्डलं न्यसेत् ।
मण्डलैश्च त्रिभिर्मत्स्यद्वयमत्रोपजायते ॥
तन्मत्स्याननपुच्छस्थसूत्रयोर्यत्र सङ्गतिः ।
तत्र स्थित्वा त्रिभिर्वास्य वर्तनीयं शिरश्शुभम् ॥

(कामिकागमे द्विषष्टितमपटले ॥)

## लिङ्गपीठम् ।

लिङ्गनाहसमपीठविस्तरं विस्तृतस्य शरवेदतुङ्गकम् ।
विस्तृतार्धसमगोमुखान्तकं गोमुखान्तसमकण्ठनाहकम् ॥

(सकलागमसारसङ्ग्रहे ॥)

त्रिगुणं लिङ्गविस्तारं त्रिगुणार्धं चतुर्गुणम् ।
त्रिविधस्त्वधमादिस्तु पीठविस्तारमुच्यते ॥
विष्णुभागस्य चोत्सेधं पीठोत्सेधं विधीयते ।
अथवा ब्रह्मभागस्य चाष्टांशेन समन्वितम् ॥
पद्मपीठं भद्रपीठं वेदिका परिमण्डलम् ।
पीठं चतुर्विधं प्रोक्तं लक्षणं शृणु सांप्रतम् ॥
कृत्वा षोडश चोत्सेधं द्व्यंशेन च तु पट्टिका ।
पद्मभागं तदूर्ध्वाब्जं दलैष्षोडशभिर्युतम् ॥

GSL



दलमर्धाङ्गुलोत्सेधं पद्मपीठमिहोच्यते ।
द्विभागं मध्यवृत्तं तु समन्तात्सदृढं (?) दृढम् ॥

चतुर्भिरूर्ध्वपद्मं तु द्विभागेनोर्ध्वपट्टिका ।
तदूर्ध्वे तु ततः कुर्यादेकांशं घृतवारिणा ॥

पीठतारत्रिभागैकं नालं कुर्यात्तथोत्तरे ।
तत्तारस्य चतुर्थांशं तदर्धार्धमथादिकम् ॥

द्विगुणं त्रिगुणं मूलं तद(म)ग्रं चार्धनाशनम् ।
विस्तारस्य चतुर्थांशादर्धादर्धमथापि वा ॥

जलमार्गं त्रिभागैकं कुर्यात्तत्र विशेषतः ।
एवं तु पद्मपीठं हि भद्रपीठमथ शृणु ॥

पूर्ववत् षोडशांशं तु कृत्वोत्सेधं विधानतः ।
भागेनोपानमेकेन चतुर्भिर्जगतीभवेत् ॥

कुमदं तु त्रिभिर्भागैरेकेनैव तु पट्टिका ।
कण्ठं कुर्यात्त्रिभिर्भागैरेकांशेन तु पट्टिका ॥

महापट्टिका द्व्यंशा तु एकेन घृतवारिणी ।
भद्रपीठं समाख्यातं वेदिपीठमथोच्यते ॥

पीठोत्सेधे नवांशे तु द्वियंशेन तु पट्टिका ।
चतर्भिः कण्ठतुङ्गं तु त्र्यंशेनैवोर्ध्वपट्टिका ॥

GSL



वृतवार्यैकभागं तु समन्ताच्चतुरश्रकम् ।
वेदिपीठं समाख्यातं परिमण्डलमुच्यते ॥
भद्रमेव हि वृत्तं स्यादेतद्वै परिमण्डलम् ।
तेष्वाकांशसमं वापि त्रिपादं वार्धमेव वा ॥
पीठाङ्गानां प्रवेशं च तथा निर्गमनं पुनः ।
सकलानां च लिङ्गानां सामान्यं पीठलक्षणम् ॥
(सुप्रभेदागमे त्रयस्त्रिंशपटले ॥)

स्त्रीशिलां तु परिग्राह्य पीठं कुर्याद्विशेषतः ।
लिङ्गविस्तारमानेन त्रिगुणं पीठविस्तृतम् ॥
कण्ठद्विगुणमेवं वा त्रिगुणं पीठविस्तृतम् ।
कण्ठस्य द्विगुणार्धं वा लिङ्गदैर्घ्यसमं तु वा ॥
गर्भगेहं त्रिधा भज्य भागैकं पीठविस्तृतम् ।
लिङ्गमानेन हर्म्यं स्यात् लिङ्गमानेन पिण्डिका ॥
पूर्वाकृतिर्यथा पीठं तथा कुर्यात्पुनः पुनः ।
अन्याकृतिर्न कर्तव्या कृता चेत्कर्तृनाशिनी ॥
वेदाश्राष्टाश्रमानं तु विभजेदष्टधा पुनः ।
गुणभागमधस्त्यक्त्वा बाणांशं पीठिकोच्छ्रयम् ॥
ब्राह्मवैष्णवमानं तु षोडशांशेन भाजयेत् ।
सप्तभागमधो मुक्त्वा ग्रहांशं पिण्डिकोच्छ्रयम् ॥

GSL



पीठोत्सेधं तु यन्मानं विकारांशेन भाजयेत् ।
पक्षांशं पट्टिका प्रोक्ता बाणांशं पद्मपिण्डकम् ॥

अंशद्वयेन वृत्तं स्याद्वेदांशमूर्ध्वपद्मकम् ।
तस्योर्ध्वे पट्टिका द्वाभ्यामंशेन घृतवारिणी ॥

पीठतारत्रिभागैकं नालनिर्गममुच्यते ।
तत्समं मूलविस्तारं तत्त्रिभागैकमग्रतः ॥

उत्तरे जलमार्गं स्यात्सोमस्याभिमुखं भवेत् ।
मध्ये खातं त्रिभागैकं क्रमेण कृशता भवेत् ॥

एवं तु पद्मपीठं स्याद्भद्रपीठमथोच्यते ।
पूर्ववत् षोडशांशेन पीठोत्सेधं भजेत्ततः ॥

व्योमांशं पादुकोत्सेधं वेदांशं जगती भवेत् ।
अग्न्यंशं वृत्तमित्युक्तं भागैकेन तु पट्टिका ॥

गुणांशं कण्ठमित्युक्तं भागैकेन तु पट्टिका ।
महापट्टिद्वयांशेन घृतवारि तथांशकम् ॥

एवं स्याद्भद्रपीठं तु सर्वलिङ्गेषु योग्यकम् ।
एकविंशतिभागेन पीठोत्सेधं विभाजयेत् ॥

अंशेन पादुकां कुर्याच्चतुर्धा जगतीं कुरु ।
कण्ठमेकेन कर्तव्यं पद्ममेकांशमेव च ॥

तत्कुम्भं त्रिभिरंशैश्च पद्ममेकांशमेव च ।
कुर्यादेकेन कम्पं तु पक्षांशेनैव कण्ठकम् ॥

कम्पमेकेन कर्तव्यं पद्ममेकेन कारयेत् ।
महापट्टि द्विभागाभ्यां पद्ममेकांशकेन तु ॥

तस्योर्ध्वे पट्टिकैकेन घृतवारि तथांशकम् ।
विजयं नाम पीठं तु सर्वशान्तिकरं परम् ॥

विभजेत्पिण्डिकोत्सेधं अष्टादशविभागतः ।
एकेन पादुकां कुर्यादध्यर्धं कम्पपद्मयोः ॥

जगती चतुरंशं स्याद्गुणांशेनैव वप्रकम् ।
तदूर्ध्वे कम्पमेकांशं द्वाभ्यां वै पट्टिका भवेत् ॥

पद्ममेकेन कर्तव्यमर्धेन घृतवारिणा ।
स्वायम्भुवमिति प्रोक्तं सर्वदेवेषु योग्यकम् ॥

विकारांशेन विभजेद्भागेनोपानमुच्यते ।
पद्मपिण्डी द्विभागेन कम्पमेकेन कारयेत् ॥

सप्तांशं कण्ठमित्युक्तं द्वाभ्यां वै कम्पपद्मकौ ।
अध्यर्धेन महापट्टी पद्ममर्धेन कारयेत् ॥

कम्पमर्धेन कर्तव्यमर्धेन घृतवारिणा ।
स्थण्डिलं स्यादिदं पीठं सर्वदेवेषु पूजितम् ॥

भागार्धं तत्त्रिपादं वा समं वा शेषनिर्गमम् ।
मूलादष्टांशमग्रे तु हीनं स्यात्पद्मपीठके ॥

सर्वेषामेव पीठानामुपानात्पीठविस्तरम् ।
पीठिकालक्षणं प्रोक्तं पादशैलविधिं शृणु ॥

(पूर्वकारणागमे नवमपटले ॥)

निष्कलानां तु लिङ्गानां सकलानामथाधुना ।
सामान्येन विधानेन वक्ष्येऽहं पीठलक्षणम् ॥ १ ॥

जात्यैकया विधातव्यं नेष्टमन्योन्यसङ्करम् ।
आहुश्शैले द्रुमे केचित् पीठं पक्वेष्टकामयम् ॥ २ ॥

लोहजं मणिलिङ्गानां लोहजानां तु पैण्डिकम् ।
आदाय स्त्रीशिलां सम्यक् पीठं लि स्य निर्मितम् ॥ ३ ॥

---

நிஷ்கலமான லிங்கங்களுக்கும் பிரதிமைகளுக்கும் ஸாமான்ய விதியாலே பீடலக்ஷணம் சொல்லக்கடவேன். (1)

பீடத்தை லிங்கத்துக்கொத்த ஜாதியாகக்கொள்ளுவான். ஒன்றுக்கொன்று கலந்து செய்யலாகாது. (1½)

சிலையாலுண்டான லிங்கத்திலும் விருக்ஷஜமான லிங்கத்திலும் பீடத்தைச்சுட்டசெங்கலாலே கட்டுவானென்று சிலர் சொல்லுவார்கள். (2)

ஸ்படிகம் முதலான மணிலிங்கங்களுக்கும் லோஹஜமான லிங்கங்களுக்கும் பீடங்களை லோஹஜமாகவே கொள்ளுவான். (2½)

சிலாமயமான லிங்கத்துக்கு ஸ்திரீ சிலையாலே பீடத்தை நிர்மிப்பான். (3)

GSL



पूजांशद्विगुणं हीनं श्रेष्ठं लिङ्गोन्नतेः समम् ।
......ते पीठविस्तारास्तयोर्मध्येऽष्टभाजिते ॥ ४ ॥

उत्तमा मध्यमा हीनास्त्रिभिर्भेदाः प्रकीर्तिताः ।
अथवा लिङ्गतुङ्गार्धं हीनं पादोनकं वरम् ॥ ५ ॥

तयोर्मध्येऽष्टभागे तु ........सानि पूर्ववत् ।
विष्कम्भं त्रिगुणं वाथ नाहतुल्यविशालकम् ॥ ६ ॥

---

பீடம் பூஜாம்சத்திலிரட்டி அதமம். ஒன்றுன லிங் கோத்ஸேதம் உத்தமம். மத்தியமத்துக்கும் உத்தம பிரமாணத்துக்கும் நடுவே எட்டம்சம் செய்ய ஒன்பது பிரமாணமாம். ஆக பீட விஸ்தாரங்கள் ஒன்பது படி சொல்லப்பட்டது.

உத்தமோத்தமம் உத்தமமத்தியமம் உத்தமாதமம், மத்யமோத்தமம் மத்யமமத்யமம் மத்யமாதமம், அத மோத்தமம் அதமமத்தியமம் அதமாதமம் ஆக ஒன்பது பிரமாணத்தையுமறிவான்.

லிங்கோத்ஸேதத்தில் பாதி அதமம். லிங்கோத் ஸேதத்தில் முக்கால்............உத்தம பிரமாணம். இந்த இரண்டு பிரமாணத்துக்கு நடுவு எட்டம்சம் செய்வான். பத்து பீடவிஸ்தாரத்துக்கு பிரமாணமாம்; உத்தமம். இந்த பிரமாணத்தில் உத்தம மத்யமாதமங்களை முன்பு போலே அறிவான் (5½)

அன்றிக்கே லிங்கவிஸ்தாரத்தில் மும்மடங்கு ஆதல் லிங்கத்தில் சுற்றளவு ஆதல் பீடவிஸ்தாரமாக சொல்லப் பட்டது. (6)

GSL



विष्कम्भकर्णाद्विगुणं सार्धद्विगुणं तु वै ।
पीठविस्तारमुद्दिष्टं स्वाष्टांशोनमथोपरि ॥ ७ ॥

मण्डनाय स्वविस्ताराष्टांशेनैवाधिकं ततः ।
सर्वेषामपि पीठानां जन्मान्तं मूलविस्तृतम् ॥ ८ ॥

अग्रव्यासं महापट्टिकान्तं सम्यक् प्रकीर्तितम् ।
विष्णुभागसमोत्सेधं सपादं सार्धमेव वा ॥ ९ ॥

चतुरश्रं च वस्वश्रं षडश्रं द्वादशाश्रकम् ।
द्विरष्टाश्रं सुवृत्तं च तेषामेवायतान्यपि ॥ १० ॥

---

லிங்கவிஸ்தாரத்தில் தன்னில் சதுரித்து அந்த கர்ணத்தில் இரட்டியாதல் இரண்டரையாதல் மும்மடங்கு பீடவிஸ்தாரமென்று சொல்லப்பட்டது. இந்தப்பீடவிஸ்தாரங்களில் எட்டிலொன்று பீடத்துக்கு மேல்குறைந்திருப்பது. (7)

அலங்காரத்தின் பொருட்டு முன்புசொன்னவிஸ்தாரத்தில் எட்டிலொன்று ஏற்றி பீடவிஸ்தாரம் கொள்க. எல்லாபிரமாணங்களும் சொன்ன விஸ்தாரபிரமாணமுமாக உபானத்திலே கொள்வான். (8)

அக்ரவிஸ்தாரபிரமாணத்தை மஹாபட்டிகையறுதி கொள்வான் என்று அழகியதாக சொல்லப்பட்டது. பீடோத்ஸேதம் விஷ்ணுபாகத்தின்மேலே ஒன்றுகால் ஒன்றரையாதல் பீடத்துக்கு உத்ஸேதம் கொள்ளுவான் என்று சொல்லப்பட்டது. (9)

CSL



त्रिकोणमर्धचन्द्रं च चतुर्दशनिभानि वै ।
समानि यानि लिङ्गस्य चाहुः पीठं च संज्ञकम् ॥११॥
आयतान्यासनानीति निष्कलानां वदन्ति वै ।
त्रिकोणमर्धचन्द्रं च निष्कले सकले क्रमात् ॥ १२ ॥
भद्रपीठं च चन्द्रं च वज्रपीठं महाम्बुजम् ।
श्रीकरं (विकरं) पद्मपीठं च महावज्रं च सौम्यकम् ॥ १३ ॥
श्रीकामार्थमिति प्रोक्ता नाम्नैता नव पीठिकाः ।
स्वनामाकृतियुक्त्या तु त्रिकोणार्धेन्दुसंयुते ॥ १४ ॥

---

*சதுரச்ரம், ஆயதசதுரச்ரம், அஷ்டாச்ரம், ஆயதமான அஷ்டாச்ரம், ஷடச்ரம், ஆயதமான ஷடச்ரம், துவா தசாச்ரம், ஆயதமான துவாதசாச்ரம் ஷோடசாச்ரம் ஆயதமான ஷோடசாச்ரம் விருத்தம் ஆயதவிருத்தம் மூன்றுகோணம் அர்த்தசந்திரன் ஆக பதினாலுபடி பீடத்துக்கு வடிவு சொல்லப்பட்டது.* (11)

*நீளமான பீடங்களை நிஷ்கலமான லிங்கங்களுக்கு ஆஸனமென்று சொல்லுவார்கள். நிஷ்களத்துக்கு திரி கோணபீடமும் சகளத்துக்கு அர்த்தசந்திரனும் கொள்வா னென்று சொல்லப்பட்டது.* (12)

*பத்ரபீடம், பத்மம், மஹாம்புஜம், ஸ்ரீகரம், பத்ம பீடம், மஹாவஜ்ரம், ஸௌம்யகம், ஸ்ரீகாம்யம் ஆகப்பீடத் துக்கு..........சொல்லப்பட்டது.* (13½)

*திரிகோணத்திலும் அர்த்தசந்திரனிலும் தன்னுடைய நாமத்துக்கிடாக யுக்தியினாலே கொள்வான்.* (14)

GSL



पीठिकानामलङ्कारं क्रमशो वक्ष्यतेऽधुना ।
गृहीतोत्सेधमानांशवशेन विविधेन च ॥ १५ ॥

त्रि:पञ्चांशे द्व्यंशि जन्मं युगांशं वप्रस्योर्ध्वं............
....द्व्यंशं क्षेपणं चार्धमूर्ध्वे सार्धग्रीवं पूर्ववत्क्षेपणोच्चम् ॥ १६ ॥
द्व्यंशं पट्टं स्नेहवार्यर्धभागं तत्सामान्यं भद्रपीठं स्वदृष्टम् ।
विप्रोर्वीभृद्वैश्यकानां परेषां श्रीसौभाग्यारोग्यभोग्यप्रदायि ॥ १७ ॥
द्विरष्टभागेऽश्विनिबाणनेत्रैर्युगांशनेत्रेन्दुभिरत्र पट्टम् ।
......पं च वृत्तं च दलं च पट्टं स्यात्पद्मपीठं घृतवारियुक्तम् ॥ १८ ॥

---

நிச்சயித்துக்கொண்டபலபடியான உத்ஸேத பிரமா ணத்தாலே அடைவே பீடங்களுக்கு அலங்காரம் சொல் லப்படுகிறது. (15)

பீடத்தினுடைய உயரத்தை பதினஞ்சு அம்சம் செய்து இதில் உபாநம் இரண்டு, நாலம்சம் ஜகதி, ஓரம்சம் குமுதகம், அரையம்சம் கம்பு, இரண்டம்சம் குமுதகம், அரையம்சம் கம்பு, ஒன்றரை அம்சம் கண்டம். அரையம்சம் கம்பு இரண்டம்சம் பட்டிகை ஒன்றரையம்சம் ஸ்நேஹ வாரி ஆக அம்சம் பதினஞ்சு. இது பத்ர பத்ரபீடத் துக்கு அலங்காரம். இந்த பீடம் பிராமணருக்கும் ராஜாக்களுக்கும், செட்டிகளுக்கும் வெள்ளாளருக்கும் ஸ்ரீயையும் ஸௌபாக்கியத்தையும் ஆரோக்கியத்தையும் போக்யத்தையும் கொடுக்குமென்று சொல்லப்பட்டது.(17)

பத்மபீடமென்கிற பீடத்தினுடைய உத்ஸேதத்தை பதினறம்சம் செய்து இதில் இரண்டம்சம் உபாநம் அஞ் சம்சம் எழுதகம் இரண்டம்சம் பட்டிகை ஓரம்சம் கிருத வாரி ஆக அம்சம் பதினறு. (18)

द्विसप्तांशे सार्धमर्धं गुणार्धं जन्मं निम्नं पङ्कजं तत्क्रमेण ।
पट्टं निम्नं चार्धमर्धं तु भागं वज्रं निम्नं कम्पकं पूर्ववत् स्यात् ॥१९॥
त्र्यंशं पद्मं निम्नमर्धं तदूर्ध्वे ह्यध्यर्धांशा पट्टिकाज्यार्धभागा ।
एतत्पीठं वज्रपद्मं हि नाम्ना सामान्यं तत्सर्वलिङ्गेषु शस्तम् ॥ २० ॥
त्रिषड्भागैर्व्यर्धवेदांशकार्धैस्सार्धव्यर्धार्धकार्धानलांशैः ।
अर्धाध्यर्धार्धांशकैर्जन्ममब्जं पट्टं निम्नं पङ्कजं वृत्तमब्जम् ॥ २१ ॥
निम्नं पट्टं पङ्क........श्रीपट्टं तत्स्नेहभारं क्रमेण ।
ए.........सम्यगुक्तं महाब्जं चित्रं सद्भिः पौरुषे चार्षकेऽपि ॥२२॥

---

வஜ்ரபத்மமென்ற பேரையுடைய பீடத்தில் உத்ஸேதத்தை பதினாலம்சம் செய்து இதில் ஒன்றரையம்சம் உபானம் அரையம்சம் நிம்னம். மூன்றரையம்சம் எழுதகம். இதன் மேல் அரையம்சம் பட்டம்........யம்சம் நிம்னம் ஓரம்சம் வஜ்ரம் அரையம்சம் நிம்னம் அரையம்சம் கம்பு மூன்றம்சம் எழுதகம். அரையம்சம் நிம்நம் ஒன்றரையம்சம் பட்டிகை அரையம்சம் கிருதவாரி. ஆக அம்சம் பதினாலு இந்த வஜ்ரபீடத்தை எல்லா லிங்கங்களுக்கும் கொள்வானென்று சொல்லப்பட்டது. (20)

மஹாப்ஜமென்ற நாமத்தோடுகூடிய பீடோத்ஸேதத்தை பதினெட்டம்சம் செய்து இதில் ஒன்றரையம்சம் எழுதகம். மூன்றம்சம் குமுதகம். அரையம்சம் எழுதகம். அரையம்சம் கம்பு. அரையம்சம் பத்மம். ஒன்றரையம்சம் பட்டிகை கிருதவாரி யரையம்சம் ஆக அம்சம் பதினெட்டு இந்த மஹாபத்ம பீடம் ஆர்ஷலிங்கத்துக்கும் மாநுஷலிங்கத்துக்கும் ஆமென்று சொல்லப்பட்டது. (22)

लब्धोत्सेधे षोडशांशेऽशि जन्म त्र्यंशं पद्मं पद्मतुङ्गं युगांशम् ।
हृद्वागार्धं द्व्यंशि वृत्तं धगार्धं पद्मं त्र्यंशं पट्टिका सार्धभागा ॥ २३ ॥
अर्धांशं तत्स्नेहवार्यर्धघातं तावद्व्यासं त्र्यंशकं वा युगांशम् ।
नालव्यासं निर्गमं त[स्य*]त्र्यंशं कुर्यादग्रं श्रीकरं श्रीकरं तत् ॥ २४ ॥
अध्यर्धार्धद्व्यर्धकार्धार्धकार्धैः पक्षार्धैर्द्व्यर्धैः खुरं निम्नमब्जम् ।
पट्टं निम्नं पट्टमब्जं तु निम्नं पट्टं निम्नं पीठपद्मं दशांशे ॥ २५ ॥
त्रिःपञ्चांशे लब्धतुङ्गे स चार्धेऽर्धाद्व्यर्धं सार्धेन्दुभागैः ।
अर्धद्व्यर्धाद्व्यर्धकार्धैः क्रमेण जन्मं निम्नं पट्टकं तत्क्रमेण ॥ २६ ॥

---

ஸ்ரீகரமென்று நாமத்தையுடைய பீடோத்ஸேதத்தை பதினாறம்சம் செய்து இதிலோரம்சம் உபாநம், மூன்றம்சம் மஹோபாநம் நாலம்சம் பத்மம், அரையம்சம் கம்பு, இரண்டம்சம் விருத்தம் அரையம்சம் கம்பு மூன்றம்சம் பத்மம். ஒன்றரையம்சம் பட்டிகை அரையம்சம் கிருதவாரி. ஆக அம்சம் பதினாறு. கிருதவாரியினுடைய தாழ்ச்சியும் அரையம்சம். பீடவிஸ்தாரத்தில் மூன்றிலொன்று நாலிலொன்று நாளவிஸ்தாரம் கொள்வது. நாளக்கழத்தி பீடவிஸ்தாரத்தில் மூன்றிலொன்று கொள்க. நாளத்தில் விஸ்தாரம் நாளத்தினுடைய மூலவிஸ்தாரத்தில் மூன்றிலொன்றாகக் கொள்க. என்று சொல்லப்பட்டது. இது கர்த்தாவுக்கு ஸ்ரீயைக்கொடுக்கும். (24)

பீடபத்மம் தசாம்சம் என்றது. பீடபத்மமென்று நாமதேயத்தையுடைத்தான பீடோத்ஸேதத்தை பத்தம்சம்செய்து இதில் ஒன்றரையம்சம் உபாநம். அரையம்சம் நிம்னம். இரண்டரையம்சம் பத்மம். அரையம்சம் கம்பு

जन्मं निम्नं पङ्कजं पट्टकं तद्वज्रं वृत्तं (तत्)क्षेपणं कञ्जमूर्ध्वे ।
पट्टं निम्नं तन्महावज्रमुक्तं........................ ॥ २७ ॥

वज्रं वृत्तं तुङ्गनाम्ना तदेव सौम्यं पीठं सम्पदायुष्करं स्यात् ।
द्विषड्भागे चन्द्रनेत्रार्धभागैः सार्धार्धैः सार्धसार्धार्धकार्धैः ॥ २८ ॥

अध्यर्धेनार्धेन निम्नं तु वप्रं निम्नं पद्मं धृग्धलं वृत्तमब्जम् ।
धृक्पद्मं तत्पट्टिकानिम्नपट्टं श्रीकामं तल्लब्धतुङ्गे मयोक्तम् ॥ २९ ॥

---

அரையம்சம் நிம்னம். அரையம்சம் பட்டம் இரண்டம்சம் பத்மம் அரையம்சம் நிம்னம் ஓரம்சம் பட்டிகை அரையம்சம் கிருதவாரி ஆக அம்சம் பத்து.

மஹாவஜ்ரமென்று பேரையுடையத்தான பீடோத்ஸேதத்தை பதினஞ்சம்சம்செய்து இதில் ஒன்றரையம்சம் உபாநம் அரையம்சம் நிம்னம். நாலம்சம் பத்மம். அரையம்சம் பட்டம். ஓரம்சம் கண்டம். ஒன்றரையம்சம்...... ஓரம்சம் கண்டம் அரையம்சம் கம்பு இரண்டம்சம் பத்மம். ஒன்றரை அரையம்சம் கிருதவாரி ஆக அம்சம் பதினஞ்சு மஹாவஜ்ர பீடம் சொல்லப்பட்டது. (27)

இந்த மஹாவஜ்ரபீடத்தில் வஜ்ரம்விருத்தமாக ஸௌம்யபீடமென்று நாமமாம். இந்த ஸௌம்யபீடமானது கர்த்தாவுக்கு ஸர்வஸம்பத்தைக் கொடுக்கும். ஸௌம்யபீடமும் சொல்லப்பட்டது.

ஸ்ரீகாம்யமென்று நாமதேயத்தை யுடைத்தான பீடோத்ஸேதத்தை பன்னிரண்டுசெய்து இதில் ஓரம்சம்

धाम्नि प्रोक्तान्यप्यधिष्ठानकानीत्यन्यप्यस्मिन्मण्डनीयानि युक्त्या ।
यथाबलं यथाशोभं यथायुक्ति प्रवेशनम् ।
निर्गमं सर्वपीठानां अङ्गानां परिकल्पयेत्[1] ॥ ३० ॥

---

க்ஷுத்ரோபாகம். இரண்டம்சம் ஜகதி. அரையம்சம் நிம்னம். ஓரம்சம் பத்மம். ஒன்றரையம்சம் பட்டிகை அரையம்சம் கிருதவாரி ஆக அம்சம் பன்னிரண்டு. இப்படி ஸ்ரீகாம்யபீடம் சொல்லப்பட்டது.

பிராஸாதங்களில்கொண்ட அதிஷ்டானங்களில் அலங்காரம்போல பீடங்களுக்கும் கொள்ளலாமென்று சொல்லப்பட்டது.

இந்த பீடாலங்காரங்களுடைய அம்சங்களில் சுறாப்புக்களும் பிறப்பாடும் இவ்வங்கங்களுடைய பலத்துக்கிடாகவும் சோபைக்கிடாகவும் யுக்திக்கிடாகவும் கொள்வான். இந்த அங்கங்களை யழகியதாக கல்பிப்பான்.

(मयमते चतुस्त्रिंशाध्याये ॥)

---

१ अस्मिन् पीठलक्षणे मूलव्याख्यानयोः लेखकप्रमाददजनितं वर्णलोप पङ्क्तिलोपादिकमुपलभ्यते ॥

लिङ्गोद्भवादिचतुर्मूर्तयः ।

GSL

# लिङ्गोद्भवादिचतुर्मूर्तयः ।

## लिङ्गोद्भवमूर्तिः ।

अथ वक्ष्ये विशेषेण लिङ्गोद्भवविधिं शृणु ।
लिङ्गाकारस्य मध्ये तु चन्द्रशेखरमूर्तिवत् ॥

नळकात्तलपर्यन्तं लिङ्गे शूलसमन्वितम् ।
ब्रह्मापि हंसरूपेण ऊर्ध्वे वै वामपार्श्वके ॥

विष्णुर्वराहरूपेण दक्षिणेंऽशे त्वधोगतः ।
विष्णुर्दक्षिणपार्श्वे तु वामपार्श्वे पितामहः ॥

हृदयेऽञ्जलिसंयुक्तौ स्थितौ लिङ्गं समीक्ष्य च ।
रक्तश्यामहिरण्याभा ईशविष्णुपितामहाः ॥

एवं लिङ्गोद्भवं ख्यातं वृक्षसङ्ग्रहणं ततः ।

(अंशुमद्भेदागमे षट्सप्ततितमपटले ॥)

पूर्ववत्कारयेत्सम्यक् चन्द्रशेखरमूर्तिनम् ।
लिङ्गाधः शर्वजान्वन्तभागं नेन्द्रियगोचरम् ॥

लिङ्गोर्ध्वाधःप्रदेशे तु हंससूकरमाचरेत् ।
बिम्बस्याननमानेन कारयेद्धंसमादरात् ॥

GSL



बिम्बद्विमुखमानेन भूकृष्टास्यं तु सूकरम् ।
ब्रह्मविष्णू द्विपार्श्वस्थौ नतौ तस्यानुकूलकौ ॥
तिर्यग्गतसुपादौ तौ सर्वावयवसुन्दरौ ।
लिङ्गोद्भवस्त्विति ख्यातो ब्रह्मविष्ण्वभिनन्दितः ॥
ब्रह्मविष्णुविहीनो वा हंससूकरसंयुतः ।

(उत्तरकामिकागमे पञ्चाशत्तमपटले ॥)

लिङ्गं कृत्वोर्ध्वतो ब्रह्मा हंसरूपं तथैव च ।
विष्णुं वराहवक्त्रं तु लिङ्गस्याधः प्रकल्पयेत् ॥
हृदयेऽञ्जलिसंयुक्तौ ब्रह्मविष्णू च पार्श्वयोः ।
लिङ्गमध्ये तु कर्तव्यं पूर्ववच्चन्द्रशेखरम् ॥
अदृश्या तस्य पादाब्जौ तथैव मकुटं यथा ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

अथ लिङ्गोद्भवं वक्ष्ये लिङ्गाकारस्य मध्यतः ।
नलकात् पादस्य तलं लिङ्गे शूलसमायुतम् ॥
चन्द्रशेखरवत्सर्वं कारयेत्सुन्दराकृतिम् ।
ब्रह्मा तु हंसरूपेण ऊर्ध्वगो वामपार्श्वतः ॥
विष्णुर्वराहरूपेण दक्षिणांशे त्वधोगतः ।
हृदयेऽञ्जलिसंयुक्तौ रक्तश्यामनिभौ परम् ॥

GSL



वीक्षमाणौ परं लिङ्गमिदं लिङ्गोद्भवं स्मृतम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

आयामं यत्तु लिङ्गस्य भूतांशं विभजेत्ततः ।
ऊर्ध्वे व्योमांशकं त्यक्त्वा मूले चैव तथा भवेत् ॥
तन्मध्ये कारयेद्धीमांश्चन्द्रशेखरमूर्तिताम् ।
अजविष्णू द्विपार्श्वे द्वौ नमस्कृत्वानुकूलकौ ॥
धर्मांशं विभजेल्लिङ्गं शरांशमुदयान्तयोः ।
लिङ्गोर्ध्वे कारयेद्धंसमधस्तात्सूकराननम् ॥
विष्णुं सङ्कल्पयेदुर्वीमानेनैव कर्षितम् ।
बिम्बस्य द्विमुखेनैव हंसरूपं तु कारयेत् ॥
ऋज्वागातिस्थितिं वामाद्वरदाभयहस्तकम् ।
कृष्णापरशुसंयुक्तं कारयेदिन्दुशेखरम् ॥
अधोभागे तु भागेन जान्वन्तं तु न दृश्यकम् ।
एवं लिङ्गोद्भवं कुर्याच्चन्द्रशेखरमुच्यते ॥

(कारणागमे एकादशपटले ॥)

लिङ्गाकारस्य मध्ये तु चन्द्रशेखरवत्स्थितम् ।
नलकाधस्स्थितं पादं लिङ्गोद्भवसमन्वितम् ॥
विरिञ्चिर्हंसरूपेण चोर्ध्वगो वामपार्श्वके ।
दक्षे वराहरूपस्य रूपेणाधोगतो हरिः ॥

वामदक्षिणपार्श्वस्थौ कृताञ्जलिसमन्वितौ ।
स्वरूपेण द्विपादस्थावजविष्णू विभोः परे ॥
एवं लिङ्गावतारं तु सर्वशान्तिकरं सदा ।
तुङ्गाङ्गविस्तृतिनतांसकलम्बमानैस्संपन्नचिह्नभुजभूषणवर्णभेदैः ।
शोभान्वितं शुभकरं सकलप्रजानामैश्वर्यसङ्घपरिवृद्धिकरं विदध्यात् ॥

(श्रीतत्वनिधौ ॥)

## चन्द्रशेखरमूर्तिः ।

इन्दुमौलिप्रतिष्ठां तु वक्ष्ये लक्षणपूर्विकाम् ।
आपाद्य च शिलादीनि तैः कुर्य्यात्प्रतिमां गुरुः ॥
चतुर्भुजस्त्रिनेत्रश्च समपादस्थानके स्थितः ।
वराभयसमायुक्तपूर्वस्थकरपल्लवः ॥
वरदं वामहस्ते स्यादभयं दक्षिणे करे ।
वरदं यदि तं कुर्य्यादथान्यस्सिंहकर्णिकः ॥
ऊरुस्पृष्टकरो वापि कटको वा विधीयते ।
मृगटङ्ककरावन्यौ दोस्सीमान्तं व्यवस्थितौ ॥
मृगटङ्कौ तु कर्णान्तौ कर्त्तरीसंव्यवस्थितौ ।
पराङ्मुखोऽभिमुखो वा मृगष्टङ्कः पराङ्मुखः ॥
रत्नपत्रिकया वापि शङ्खपत्रिकयापि वा ।
पद्मपत्रिकया वापि शोभितं वामकर्णकम् ॥

GSL



सव्यं मकरसिंहाढ्यपत्रकुण्डलकैर्युतम् ।
पृष्ठतः कर्णपर्यन्तं केशवर्तिविलम्बनम् ॥
पार्श्वयोर्बाहुमूलात्तु जटाग्राणां विलम्बनम् ।
हारयुग्ग्रीवसंयुक्तं तथा कर्णिकयान्वितम् ॥
वक्षस्स्थलं प्रकर्तव्यं भुजाः केयूरसंयुताः ।
सुपत्रवल्योपेतास्सर्वरत्नोपशोभिताः ॥
मुक्तादामविलम्बाश्च तदग्रं मणिभूषणम् ।
कराग्रं कटकोपेतमङ्गुल्यो मुद्रिकान्विताः ॥
छन्नवीरोत्तरीयोपवीतैस्सोदरबन्धनः ।
समस्तरत्नपाशाढ्यकलिमाननदामभिः ॥
संयुक्तकटिसूत्रोऽन्तः पादजालकसंयुतः ।
चन्द्रशेखर एवं स्याद्देव्या च सहितो न वा ॥
सापीठाभिन्नपीठा वा देवेनालिङ्गिताथवा ।
तयालिङ्गितदेवो वा अन्योन्यालिङ्गितस्तु वा ॥
आलिङ्गनयुतो वा स्यान्निरालिङ्गोऽथवा मतः ।

(उत्तरकामिकागमे अष्टाचत्वारिंशत्तमपटले ॥)

ऋज्वागतं तु तं देवं मृगं परशुधारिणम् ।
कृत्यम्बरधरं देवं कर्तव्यं चन्द्रशेखरम् ॥

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

GL



लिङ्गं च विष्णुरूपं च विना कुर्विन्दुशेखरम् ।

(पूर्वकारणागमे एकादशपटले ॥)

अभयवरदहस्तं सौम्यशृङ्गारभावं
विपुलवदननेत्रं चन्द्रबिम्बांशमौलिम् ।
ऋजुतनुसमपादस्थानकं विद्रुमाभं
हरिणपरशुपाणिं पद्मपीठोपरिस्थम् ॥

एतत्पार्श्वस्थगौरी ।

श्यामां त्रिनेत्रां द्विभुजां त्रिभङ्गीं सव्यापसव्यस्थितकुञ्चिताङ्घ्रिम् ।
सव्ये तु नीलोत्पलचारुहस्तां देवस्य वामस्थितपद्मपीठाम् ॥

(श्रीतत्वनिधौ ॥)

केवलमूर्तिः ।

अभयं दक्षिणं हस्तं वरदं वाममुच्यते ।
वरदं वामहस्तं तु अधोमुखं प्रकल्पयेत् ॥
तन्मूलं कटिस्पृष्टं मेढ्राग्रान्तं तु तत्करे ।
ऊर्ध्ववक्त्रं तु वरदं पृष्ठं नाभिसमोद्धृतम् ॥
आर्जवं राजसं भावं कल्पयेद्द्विजसत्तम ! ।
कर्तरी परहस्ते द्वौ टङ्कं वै दक्षिणे करे ॥
हरिणी च बाह्यवक्त्रं वाभ्यन्तरमुखं तु वा ।
जटामकुटसंयुक्तं दक्षिणार्धेन्दुसंयुतम् ॥

GSL



वामेन्दुशेखरं वाथ प्रवालसदृशप्रभम् ।
त्रिनेत्रं सौम्यवदनं सर्वाभरणभूषणम् ॥
पीताम्बरं तथा देवं वस्त्राग्रौ नलकान्तगौ ।
उभयोः पार्श्वयोरेवमम्बरं तूरुमध्यगम् ॥

(अंशुमद्भेदागमे त्रिषष्टितमपटले ॥)

केवलं गौरिसहितमालिङ्गं च त्रिधा भवेत् ।
केवलं समपादं तु स्थान [कं परि*] कल्पयेत् ॥
अभयं दक्षिणं हस्तं वरदं वाममुच्यते ।
हरिणी वामहस्ते तु टङ्कं वै दक्षिणे करे ॥
जटामकुटसंयुक्तं दक्षिणेर्धेन्दुशेखरम् ।
वामेन्दुशेखरं वाथ प्रवालसदृशप्रभम् ॥
त्रिनेत्रं सौम्यवदनं सर्वाभरणभूषितम् ।
पीताम्बरधरं देवं वस्त्राग्रै नलकान्तगौ ॥
उभयोः पार्श्वयोरेवं मध्यतश्चोरुमध्यगम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

## पाशुपतमूर्तिः ।

अथ वक्ष्ये विशेषेण पाशुपतस्य लक्षणम् ।
समपादं स्थानकं स्याच्चन्द्रशेखरमूर्तिवत् ॥

GL



त्रिनेत्रं चतुर्भुजं सौम्यमूर्ध्वकेशं महातनुम् ।
अभयं शूलहस्तं च दक्षिणे तु करद्वयम् ॥
वरदं चाक्षमालां च वामपार्श्वे करद्वयम् ।
प्रवालसदृशप्रख्यं सौम्यनेत्रातिशीतलम् ॥
सर्वाभरणसंयुक्तं किंचित्प्रहसिताननम् ।
नित्योत्सवाय बिम्बं तत्स्थानकं वासनं तु वा ॥

(अंशुमद्भेदागमे एकसप्ततितमपटले ॥)

अथ पाशुपतं वक्ष्ये चन्द्रशेखरवत्स्थितम् ।
चतुर्भुजं त्रिनेत्रं चाप्यूर्ध्वकेशं महातनुम् ॥
दक्षिणेऽभयकं शूलं कपालं वरदं परे ।
प्रवालसदृशप्रख्यं सर्वाभरणभूषितम् ॥

(शिल्परत्ने द्वाविंशपटले) ॥

बलिभर्तुः प्रतिष्ठां तु वक्ष्ये तल्लक्षणं तु वै ।
नित्योत्सवे तु कथितं सूत्राद्यं चेन्दुमौलिवत् ॥
प्रायश्चित्तादिके वाथ सर्वकामप्रसिद्धये ।
नित्योत्सवेऽपि तच्छ्रेष्ठं तं मन्त्रैश्च विशेषतः ॥

(उत्तरकामिकागमे त्रिपञ्चाशत्तमपटले ॥)

GSL



## रौद्रपाशुपतमूर्तिः ।

तदेवाग्निसमं वर्णं रक्ताक्षं कुटिलभ्रुवम् ।
तीक्ष्णदंष्ट्रासमायुक्तं व्यालयज्ञोपवीतिनम् ॥
ज्वालानलशिखाकारमतिरक्तकवस्त्रधृ ।
शूलं त्वधोमुखं धृत्वा कपालं वरदोद्धृतम् ॥
अथवाभयं विना शूलमूलं धृत्वा तु तत्करे ।
शूलाग्रं वरदेनैव गृह्य तिर्य्यग्गतोद्धृतम् ॥
दक्षिणे त्वपरे हस्ते टङ्कं खड्गं च वामके ।
रौद्रं पाशुपतं ह्येतद्विलिलिङ्गे तु पूजितम् ॥
एतन्मूर्तिं सकृद् ध्यायेत्सर्वशत्रुविनाशनम् ।
एतत्तु रौद्रमूर्तिं तु प्रतिमां तु न कारयेत् ॥

(अंशुमद्भेदागमे एकसप्ततितमपटले ॥)

अथातस्संप्रवक्ष्यामि अस्त्रराजस्य पूजनम् ।
चतुर्भुजं त्रिनेत्रं च शिखाकूटसमुज्वलम् ॥
वामसव्ये च शूलं तु वरदाभयहस्तकम् ।
रौद्रपाशुपतं ह्येवं बलिबिम्बं तथोच्यते ॥

(सुप्रभेदागमे द्विपञ्चाशत्तमपटले ॥)

GSL



## पाशुपतास्त्रमूर्तिः ॥

चतुर्वक्त्रं चतुर्बाहुं सूर्यकोटिसमप्रभम् ।
संहारास्त्रं सुमूर्धानं प्रतिवक्त्रं त्रिलोचनम् ॥
दीप्तदन्ताग्रकेशभ्रूश्मश्रुभीमं महाबलम् ।
शक्तिमुद्गरशङ्खासीन्दधानं सोमसूत्रिणम् ॥
साङ्गं पाशुपतं शस्त्रं भजे पद्मासने स्थितम् ।

(श्रीतत्वनिधौ ॥)

---

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

CSL

# सुखासनादिमूर्तयः ।

GSL

# सुखासनादिमूर्तयः ।

## सुखासनमूर्तिः ।

मेरुपर्वतपार्श्वे तु मुनीनामाश्रमे तथा ।
दिगम्बरं तु मां दृष्ट्वा तेषां स्त्रीणां भ्रमोऽस्ति वै ॥

तं ज्ञात्वा मुनयस्सर्वे जुहुवुस्त्वाभिचारिकम् ।
तन्मध्ये ह्युदितानीह नागं कृष्णमृगं तथा ॥

अपस्मारं च परशुमुक्षं व्याघ्रं हरिं तथा ।
करोटिं तु महाभीममेवमाद्या गता मयि ॥

नागं मृगं च परशुं क्रीडार्थं धारितं मया ।
पादाधस्तादपस्मारं करोटिं शिरसोपरि ॥

सिंहव्याघ्रौ तदा हत्वा तच्चर्म धारितं मया ।
तदुक्षं वाहनं भूत्वा मम प्रियकरं सदा ॥

महोदधेर्विषं कण्ठे सोमार्धं शेखरे धृतम् ।
बकपुष्पं जटाभारे मया नृत्तेऽवधारितम् ॥

समानमन्यत्सर्वासां प्रतिमानां विशेषतः ।
त्रिनेत्रं चतुर्भुजं सौम्यं बालेन्दुकृतशेखरम् ॥

GL



धुस्तूरभुजगोपेतं जटामकुटमण्डितम् ।
व्याघ्रचर्माम्बरं चैव हारकेयूरसंयुतम् ॥
यज्ञोपवीतसंयुक्तं कुण्डलाभ्यामलङ्कृतम् ।
मूर्तीनां द्वादशानां तु सामान्यमिदमीरितम् ॥
अतः परं विशेषस्तु क्रमशो वक्ष्यतेऽधुना ।
आसने तु सुखासीनं मृगीपरशुधारिणम् ॥
अभयं दक्षिणे हस्ते वरदं वामहस्तके ।
कटकं वा सुखासीनमुमास्कन्दौ च वर्जितम् ॥
एवं सुखासनं प्रोक्तमुमासहितमुच्यते ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

आर्जवं राजसं भावं भद्रपीठोपरिस्थितम् ।
वामाङ्घ्रिं शाययेत्पीठे दक्षिणाङ्घ्रिं तु लम्बयेत् ॥
जागतं(?) तु सुखासीनं प्रवालसदृशप्रभम् ।
त्रिनेत्रं तु प्रसन्नास्यं संपन्नं राजसैर्गुणैः ॥
व्याघ्राजिनवरोपेतं दुकूलवसनान्वितम् ।
दक्षिणे परशुं वामे कृष्णं हस्ते समुद्धृतम् ॥
अभयं दक्षिणे वामे कटकं सिंहकर्णवत् ।
दक्षिणे मकराख्यं वा कुण्डलं सिंहमेव वा ॥

GSL



पत्रकुण्डलमन्यत्र वामकर्णे विशेषतः ।
अथवा कर्णयुगले वृत्तकुण्डलकं न्यसेत् ॥
जटामकुटसंयुक्तं नानाभरणभूषितम् ।
यज्ञोपवीतसंयुक्तं सर्पराट्कङ्कणान्वितम् ॥
एवं सुखासनं प्रोक्तं राजराष्ट्रसुखावहम् ।

(शिल्परत्ने द्वाविंशाध्याये ॥)

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
अभयं दक्षिणं हस्तं वरदं वामहस्तकम् ॥
कृष्णापरशुसंयुक्तं वामदक्षिणहस्तयोः ।
शयनं दक्षिणं पादं वामपादं तु लम्बितम् ॥
उमासहितवत्सर्वं स्कन्दगौरीविवर्जितम् ।

(पूर्वकारणागमे एकादशपटले ॥)

## उमासहितमूर्तिः ।

केवलं त्वेवमाख्यातं वामे गौरीसमायुतम् ।
तद्गौरीसहितं ख्यातं भिन्नपीठैकमेव वा ॥

(अंशुमद्भेदागमे त्रिषष्टितमपटले ॥)

केवलं त्वेवमाख्यातं वामे गौरीसमन्वितम् ।
भिन्नपीठे विशेषेण तद्गौरीसहितं विदुः ॥

(शिल्परत्ने द्वाविंशपटले ॥)

GSL



आलिङ्गमूर्तिः ।

तदेव भङ्गसंयुक्तं देवीदेवौ परस्परम् ।
देवो वरदहस्तेन देवी वै...पराश्रितम् ॥
...स्तनाभ्यन्तरे वामपार्श्वमालिङ्गनं कुरु ।
पार्श्वसूत्रात्पुरो वामबाहुमालिङ्गनं तु वा ॥
देवी दक्षिणहस्तेन शम्भोर्दक्षिणपार्श्वतः ।
कटिसूत्रोपरि स्पृष्ट्वा पुष्पं वामकरे धृता ॥
अथवा प्राग्वदेवेशो देव्यास्तु दक्षिणे करे ।
रक्तोत्पलं परिग्राह्य वामहस्तं प्रलम्बिता ॥
एवमालिङ्गमूर्तिं च विधामार्गेण कल्पयेत् ।
सर्वाभरणसंयुक्तं प्रभामण्डलमण्डितम् ॥
चन्द्रशेखरमाख्यातं वृषारूढमथ शृणु ।

(अंशुमद्भेदागमे त्रिषष्टितमपटले ॥)

देवो वरदहस्तेन देवीं तत्पार्श्वमाश्रिताम् ।
स्तनाभ्यन्तरे वामपार्श्वमालिङ्गनं कुरु ॥
पार्श्वसूत्रात्पुरो वामबाहुमालिङ्गनं तु वा ।
देवी दक्षिणहस्तेन शम्भोर्दक्षिणपार्श्वतः ॥
कटिसूत्रोपरि तथा वामे पुष्पधृता करे ।
अथवा प्राग्वदेवेशो देवी रक्तोत्पलान्विता ॥

करे तु दक्षिणे वामहस्तमात्रं प्रलम्बयेत् ।
एवमालिङ्गमूर्तिं तु त्रिधा मार्गेण कल्पयेत् ॥
एवं पञ्चविधं प्रोक्तं चन्द्रशेखरमूर्तिनम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

सोमास्कन्दः ।

वक्ष्यामि सोमोमास्कन्दसुखेशस्थापनं परम् ।
तल्लक्षणसमायुक्तं तच्चेदानीं प्रकथ्यते ॥
चतुर्भुजस्त्रिनेत्रश्च जटामकुटमण्डितः ।
सर्वाभरणसंयुक्तो वरदाभयहस्तकः ॥
कृष्णापरशुयुक्तोर्ध्ववामेतरकरान्वितः ।
असव्यसव्यकर्णस्थपत्रिकानक्रकुण्डलः ॥
सोपवीतः प्रसन्नात्मा शयितासव्यपात्तलः ।
सालम्बदक्षपादेन वामे गौर्या च संयुतः ॥
सर्वलक्षणसंयुक्तस्सर्वाभरणभूषितः ।
वामे देव्या समायुक्तस्तदध्यायप्रसिद्धया ॥
ससोमस्सोम एव स्यात्सोमास्कन्दविधिर्भवेत् ।
देवोच्चदशभागैकभागेनाथ द्विभागतः ॥
त्रिवेदभागैर्वा कुर्य्यात् स्कन्दं तन्मध्यमे गुरुः ।
द्विनेत्रस्सद्विबाहुश्च करण्डमकुटान्वितः ॥

कर्णयोर्नक्रपिण्डेन सर्वाभरणभूषितः ।
दक्षभागकरस्थाब्जः प्रसारितकरोऽपरः ॥
द्विहस्तपङ्कजो वाथ नृत्तरूपयुतोऽथवा ।
देव्यूरुसंस्थितो वापि निष्पङ्कजकरोऽथवा ॥
आसीनो वा स्थितो वापि स्कन्दस्त्वेवं प्रकीर्तितः ।
स्कन्दोमारहितस्त्वेष एवं स्यात्तु सुखासनः ॥
सोमे च सोमास्कन्दे च सुखेशे लक्षणं मतम् ।

(उत्तरकामिकागमे सप्तचत्वारिंशत्तमपटले ॥)

सहासने ह्युमादेवीं सुसौम्यवदनोज्ज्वलाम् ।
द्विभुजां पद्महस्तां तु मकुटाभरणान्विताम् ॥
कटकाख्यधरां वामे प्रसारितमथापि वा ।
उमाबाहुस्तनान्तं वा मानं वै षण्मुखस्य तु ॥
कण्ठे शूलसमायुक्तं छन्नवीरसमायुतम् ।
उमाशङ्करयोर्मध्ये स्कन्दं वै बालरूपिणम् ॥
आसनं स्थानकं वापि वरदं कटकान्वितम् ।
कृत्वा सुखासनं यद्वत् पूर्ववत्परमेश्वरम् ॥
देवस्य मुखमन्वीक्ष्य किञ्चिद् गौरीं तु कारयेत् ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

GL



अथ वक्ष्ये विशेषेण सोमास्कन्देश्वरं परम् ।
सुखासनं यथा प्रोक्तं तथा देवो विधीयते ॥
देवस्य वामपार्श्वे तु पार्वती च सहासने ।
शाययेद्दक्षिणं पादं वामपादं प्रलम्बयेत् ॥
वरदं वामहस्ते तु दक्षिणे चोत्पलं करे ।
दूर्वाश्यामनिभा देवी सर्वाभरणभूषिता ॥
रक्ताम्बरधरा हारमकुटोज्वलन्विता ।
वामोरुबाह्ये पीठे तु वामहस्ततलं न्यसेत् ॥
प्रह्वदुत्पलसंयुक्तमन्यमेवं करोतु वा ।
देवीदेवेशयोर्मध्ये स्थापयेत्स्कन्दमूर्तिनम् ॥
केशान्ते वापिकोपेतं करण्डमकुटोज्वलम् ।
उभयोर्हस्तयोः पुष्पं वामे वरदमेव वा ॥
कटकं वाथ तद्धस्ते सिंहकर्णमथापि वा ।
अथवा पुस्तकं दक्षहस्ते वामे पुरोक्तवत् ॥
कटिसूत्रयुतं नग्नं बाहुभूषणभूषितम् ।
आसीनं वा स्थितं वाथ नृत्तं वा स्कन्दमाचरेत् ॥
नृत्तं चेत् फलवद्वामहस्तमन्यत्र सूचिकम् ।
अथवा वामहस्तं तु फलं त्यक्त्वा प्रसारयेत् ॥
वक्ष्यमाणविधानेन स्कन्दनृत्तं समाचरेत् ।

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं वरदाभयहस्तकम् ॥

कृष्णापरशुसंयुक्तं दक्षिणे वामकेऽपि च ।
पत्रं तु वामकर्णे तु दक्षिणे कुण्डलं भवेत् ॥

उपवीतधरं चैव शयनं वामपादकम् ।
लम्बितं दक्षिणं पादं वामे गौरीसमायुतम् ॥

तयोर्मध्ये स्थितस्स्कन्दस्सर्वलक्षणसंयुतः ।
ब्रह्मविष्णू द्विपार्श्वाभ्यां देवीभ्यां युक्तभोगदम् ॥

देवस्य बाहुसीमान्तं देव्यास्त्वायाममुच्यते ।
द्विबाहुका द्विनेत्री च करण्डमकुटान्विता ॥

सर्वाभरणसंयुक्ता दुकूलवसनान्विता ।
शयनं दक्षिणं पादं वामपादं तु लम्बितम् ॥

कटकं दक्षिणं हस्तं वरदं वामहस्तकम् ।
बेरायामं तु विभजेदष्टधा चैव भागिकम् ॥

द्विभागं वा गुहायामं बाहु(ल ?)रूपेण कल्पयेत् ।
द्विभुजश्च द्विनेत्रश्च सर्वाभरणभूषितः ॥

कटकं दक्षिणे हस्ते वामहस्तं प्रलम्बितम् ।
आसीनो वा स्थितो वापि कारयेत्तु गुहं ततः ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA

GSL



पद्मपीठोर्ध्वके वापि केवलं पीठकोपरि ।
भवानीसहितं ह्येवं वृषवाहनमुच्यते ॥

(पूर्वकारणागमे एकादशपटले ॥)

उमामहेश्वरौ ।

युग्मं स्त्रीपुरुषं कार्यमुमेशौ दिव्यरूपिणौ ।
अष्टवक्त्रं तु देवेशं जटाचन्द्रार्धभूषितम् ॥
द्विपाणिं द्विभुजां देवीं सुमध्यां सुपयोधराम् ।
वामपाणिं तु देवस्य देव्यास्स्कन्धे नियोजयेत् ॥
दक्षिणं तु करं शम्भोरुत्पलेन विभूषितम् ।
देव्यास्तु दक्षिणं पाणिं स्कन्धे देवस्य कल्पयेत् ॥
वामपाणौ तथा देव्या दर्पणं दापयेच्छुभम् ।

(विष्णुधर्मोत्तरे ॥)

उमामहेश्वरं वक्ष्ये उमया सह शङ्करम् ।
मातुलिङ्गं त्रिशूलं च धत्ते दक्षिणे करे ॥
आलिङ्गन्वामहस्तेन नागेन्द्रं द्वितीये करे ।
हरस्कन्धे उमाहस्तो दर्पणं द्वितीये करे ॥
अधस्ताद्वृषभं कुर्यात्कुमारं च गणेश्वरम् ।
भृङ्गिरिटिं तथा कुर्यान्निर्मांसं नृत्यसंस्थितम् ।

(रूपमण्डने ॥)

GSL



सपरिवारोमामहेश्वरः ।

वामे शैलसुता पुरस्तु वृषभः पश्चात्सुरेन्द्रादयो
दैत्यारिश्च विधिश्च पार्श्वदलयोर्वाय्वादिकोणेषु च ।
भृङ्गी नारदबाणभैरवगजास्यस्कन्दवीरेश्वरा
मध्ये शुभ्रसरोजकोमलरुचं शम्भुं भजे पाण्डुरम् ॥

(श्रीतत्वनिधौ)

---

संहारमूर्तयः ।

GSL

# संहारमूर्तयः ।

---

## कामान्तकः ।

अग्रे तु दक्षिणामूर्तेर्योगनिष्ठस्य मन्मथम् ।
कुर्यात्तु पतितं दृष्टिपातादेव च तत्क्षणात् ॥
भक्त्वा दशांशं देवोच्चमेकाद्यासप्तभागिकम् ।
मन्मथोत्सेधमुद्दिष्टं स तु हेमविभूषितः ॥
शुद्धजाम्बूनदप्रख्यः पुष्पपञ्चेषुसंयुतः ।
मीनकेतुस्तथैवेक्षुकार्मुकः क(र?)तिसंयुतः ॥
देवभागवसन्ताख्यमित्रयुक्तोऽतिसुन्दरः ।
लम्भिनी तापिनी चैव वेदिनी द्राविणी तथा ॥
मारिणीति शराख्यास्स्युर्धनुर्वामे शराः परे ।
मन्मथो मित्रयुक्तो वा युतो वैकशरेण तु ॥

(उत्तरकामिकागमे सप्तपञ्चाशत्तमपटले ॥)

उग्ररूपं तु कामारिं पार्श्वे कामं प्रपातितम् ।
कार्यं कामरिपुं ह्येवं वक्ष्येऽहं कालनाशनम् ॥

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

GSL



त्रिनेत्रं चतुर्भुजं देवं जटामकुटमण्डितम् ।
उग्रदृष्टिसमायुक्तमक्षमालोरगन्धरम् ॥

दक्षिणे तु पताका च वामहस्तं तु सूचिका ।
एतदेव विशेषं तु शेषं व्याख्यानमूर्तिवत् ॥

बेरायामरसांशाच्च त्रिभागं मन्मथायतम् ।
पीठस्थो वा रथस्थो वा कामः काञ्चनसन्निभः ॥

सर्वभूषणभूष्यं च दिव्यरूपसमन्वितम् ।
पुष्पैश्चैव शरैर्युक्तमिक्षुचापं च षड्ध्वजम् (?) ॥

मदरागवसन्तैश्च हेमबान्धवसंयुतम् ।
तापिनी दहनी विश्वमोहिनी विश्वमर्दनी ॥

मादिनी नाम निर्दिष्टास्तस्य पञ्चशरा इमे ।
कार्मुकं वामहस्ते तु बाणं तु सव्यहस्तके ॥

देवस्याभिमुखं कुर्यात्कामरूपं प्रपातितम् ।
कामनिग्रहमेवं स्याच्छृणु वैवाह्यमूर्तिनम् ।

(पूर्वकारणागमे एकादशपटले ॥)

### गजासुरसंहारमूर्तिः ।

अथ वक्ष्ये विशेषेण गजहामूर्तिलक्षणम् ।
सर्वाभरणसंयुक्तं चतुर्दोश्चाष्ट एव वा ॥

MINISTRY OF CULTURE · GOVERNMENT OF INDIA
GSL



चतुर्भुजं चेत् पाशं च गजचर्म च दक्षिणे ।
गजशृङ्गं च चर्म च वामपार्श्वे करद्वये ॥
चतुर्भुजं समाख्यातमष्टहस्तमथोच्यते ।
शूलं डमरुकं पाशं गजचर्म च दक्षिणे ॥
गजशृङ्गं कपालं च गजचर्म च विस्मयम् ।
एवं पार्श्वे तु चत्वारो हस्तमेवं प्रकल्पयेत् ॥
शम्भोर्वामाङ्घ्र्यधस्तात्तु गजस्यैव तु मस्तकम् ।
मकुटस्योपरिष्टात्तु गजपुच्छं प्रकल्पयेत् ॥
पार्श्वयोर्गजपादांस्तु यथायुक्त्या तु कल्पयेत् ।
प्रभामण्डलवच्छेषं गजचर्म प्रकल्पयेत् ॥
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ।
सर्वालङ्कारसंयुक्तमतिरक्तसमप्रभम् ॥
एवं तु गजहामूर्तिं प्रथमं तु विधीयते ।
शूलं खड्गं तथा चर्म गजशृङ्गं च दक्षिणे ॥
कपालं खेटकं घण्टां गजचर्म च वामके ।
सुस्थितं वामपादं तु गजस्य मस्तकोपरि ॥
उद्धृतं दक्षिणं पादं तिर्य्यगुत्कुटिकं भवेत् ।
एवं द्विविधरीत्या तु गजहामूर्तिरुच्यते ॥
स्कन्दोद्धृताप्युमादेवी शम्भोर्वामे भयान्विता ।

(अंशुमद्भेदागमे सप्ततितमपटले ॥)

GSL



गजहामूर्तिनं वक्ष्ये सर्वाभरणभूषितम् ।
पाशं च गजचर्म च दक्षपार्श्वकरद्वये ॥

गजस्य शृङ्गं चर्म च वामपार्श्वे करद्वये ।
शूलं डमरुकं पाशं गजचर्म च दक्षिणे ॥

गजशृङ्गं कपालं च पाशं चर्म च वामतः ।
शम्भोर्वामे व्य(माङ्गय ?)धस्तात्तु गजमस्तकमेव हि ॥

मकुटस्योपरिष्टात्तु गजपुच्छं प्रकल्पयेत् ।
पार्श्वयोर्गळ(ज?)पादं तु यथा युक्त्या तु कारयेत् ॥

प्रभामण्डलवच्छेषं गजचर्म प्रकल्पयेत् ।
व्याघ्रचर्माम्बरोपेतं दुकूलवसनान्वितम् ॥

सर्वाभरणसंयुक्तमतिरक्तप्रभान्वितम् ।
सुस्थितं वामपादं तु गजवीरस्य मस्तके ॥

उद्धृतं दक्षिणं पादं कक्षसूत्रानु(न्त?)माचरेत् ।
गौरी स्कन्दं समुद्धृत्य शम्भोर्वामे भयान्विता ॥

अथवा शूलखड्गौ च गजदन्तं च चर्म च ।
दक्षिणे वामतः कुर्यात् कपालं खेटकं पुनः ॥

घण्टां च गजचर्म च कैरिति...वामतः ।

(शिल्परत्ने द्वाविंशपटले ॥)

GSL



## कालारिमूर्तिः

अथ वक्ष्ये विशेषेण कालहामूर्तिलक्षणम् ।
देवस्य दक्षिणं पादं पद्मपीठोपरिस्थितम् ॥

प्रथमनृत्तमूर्तेस्तु दक्षिणस्थितपादवत् ।
वामपादं तदुद्धृत्य कुञ्चितं तलमुद्धृतम् ॥

अङ्गुष्ठमुद्धृताङ्घ्रेस्तु कालस्य हृदये न्यसेत् ।
दंष्ट्रास्यं च त्रिनेत्रं च जटामकुटमण्डितम् ॥

चतुर्भुजसमायुक्तमष्टहस्तमथापि वा ।
दक्षिणे पूर्वहस्तं तु शूलं कर्णान्तमुद्धृतम् ॥

दक्षिणे परहस्तं तु परशुं वरदं तथा ।
वामे पूर्वकरं नाभिसीमान्तं सूच्यधोमुखम् ॥

वामे त्वपरहस्तं तु विस्मयं परिकल्पयेत् ।
हिक्कासूत्रसमं टङ्ककरं त्वभ्यन्तरं मुखम् ॥

उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ।
कर्णान्तं मणिबन्धान्तं शूलहस्तसमान्तकम् ॥

चतुर्दोर्ष्णेवमाख्यातमष्टहस्तमथ शृणु ।
शूलं परशु वज्रं च खड्गं दक्षिणहस्तके ॥

विस्मयं खेटकं पाशं सूचीहस्तं तु वामके ।
विद्रुमस्य निभाकारं सर्वाभरणभूषितम् ॥

कालहामूर्तिमाख्यातमधस्तात्काल उच्यते ।
द्विभुजं च द्विपादं च सदंष्ट्रं पाशपाणिनम् ॥
करण्डमकुटोपेतमसृग्धाराविकीर्णितम् ।
महाभयसमायुक्तं सपाशहृदयाञ्जलिम् ॥
विकीर्णपादं मां दृष्ट्वा शाययेदूर्ध्ववक्त्रकम् ।
कालहामूर्तिमेवं तु प्रोक्तं लिङ्गोद्भवं ततः ॥

(अंशुमद्भेदागमे षट्सप्ततितमपटले ॥)

कुञ्चितासव्यपादस्तु व्याघ्रचर्माम्बरान्वितः ।
ततोद्धृतसदक्षाङ्घ्रिस्तीक्ष्णदंष्ट्रोग्रनासिकः ॥
दक्षहस्तस्थशूलो वा वामहस्तस्थसूचिकः ।
दक्षहस्तस्थपरशुर्नागपाशोऽथवा मृगः ॥
कटाक्षदृष्टिर्देवस्य कालदेहव्यवस्थितः ।
शूलं ह्यधोमुखं प्रोक्तं कालकु(ग?)ण्डस्थमेव वा ॥
कालं तु पतितं कुर्य्यात्त(द्रु?)त्प्लुताक्षं तु मूर्छितम् ।
मुद्गरं र(उद्गिरद्र?)क्तवस्त्रं च तथा लोहितमूर्धजम् ॥
शूलपाशकरं चैव विकीर्णचरणान्वितम् ।
दंष्ट्राकरालवदनं रक्तभ्रूरक्तलोचनम् ॥
देवस्थ(स्य?) नाभिमानेन नवतालेन कारयेत् ।
कृताञ्जलिपुटं वापि कारयेत्कालमादरात् ॥

GSL



अथवाथ हराल्लिङ्गान्निर्गतात्पतितं नयेत् ।
कालान्त(ऌं तं ?) लिङ्गमानाद्यं लिङ्गोद्भूतोक्तवन्नयेत् ॥
त्रिभङ्गेन स्थितश्चान्योऽधोमुखो भस्मविग्रहः ।
बद्धपुष्पाञ्जलिः पार्श्वे मार्कण्डेयः स्थितो वरः ॥
कर्तव्यः कालतो भू(भी ?)तस्सन्तुष्टो न हरेण तु ।
मार्कण्डेयेन मानेन युक्तो वा वर्जितस्तु वा ॥
अपस्मारशरीरस्थचरणेन युतो न वा ।
कालारिरेवमाख्यातो मन्मथान्तक उच्यते ॥

(उत्तरकामिकागमे सप्तपञ्चाशत्तमपटले ॥)

दक्षिणे तु करे शूलं वामे सूच्यङ्गुलि स्मृतम् ।
पादं कालस्य हृदये न्यस्त्वैवं(स्यैवं ?) पादसंस्थितम् ॥
कालनाशमिदं प्रोक्तं लिङ्गोत्पत्तिमतः परम् ।

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

कालारिं कारयेदीशं नताङ्गं वामतो मनाक् ।
सुस्थितं दक्षिणं पादं पद्मपीठेऽन्यमङ्घ्रिकम् ॥
दक्षिणे पूर्वहस्ते तु शूलं कर्णान्तमुद्धृतम् ।
दक्षिणे परहस्ते तु परशु वरदं तु वा ॥
वामे पूर्वकरं नाभिसूत्रान्ते सूचिमाचरेत् ।
वामे तु परहस्ते तु विस्मयं परिकल्पयेत् ॥

GSL



उष्णीषान्तं समुद्धृत्य विस्मयेऽनामिकाग्रकम् ।
शूलं परशुवज्रौ च खड्गं दक्षिणहस्तके ॥
विस्मयं खेटकं पाशं सूचीहस्तं च वामके ।
शुद्धविद्रुमसङ्काशं सर्वाभरणसंयुतम् ॥
अधस्तात्कारयेत्कालं द्विभुजं पाशहस्तकम् ।
करण्डमकुटोपेतं सदंष्ट्रं विकृताननम् ॥
असृग्धारासमायुक्तं महाभयसमन्वितम् ।
हृदयाञ्जलिसंयुक्तं विकीर्णाङ्घ्रिद्वयं पुनः ॥

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
उद्धृतं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥
व्याघ्रचर्माम्बरोपेतं तीक्ष्णनासोग्रदंष्ट्रकम् ।
दक्षिणे तु करे शूलं सूचिहस्तं तु वामके ॥
परशुं दक्षिणे हस्ते नागपाशं तु वामके ।
अधोमुखं भवेच्छूलं दृष्टिर्वै कालदेहके ॥
अपरे तु द्विहस्तौ तु कटकाविति कीर्तितौ ।
दोस्समं कटकाग्रं तु द्व्यन्तरं तु यवं भवेत् ॥

(पूर्वकारणागमे एकादशपटले ॥)

GSL



## त्रिपुरान्तकमूर्तिः । (१)

त्रिपुरान्तकमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥
दक्षिणे पूर्वहस्तोर्ध्वे नाभिसूत्रावसानकम् ।
सिंहकर्णं तु तद्धस्तं बाणमध्यं तु पीडितम् ॥
बाणायामं तु तत्सप्तत्यङ्गुलं तु विधीयते ।
कनिष्ठिकापरीणाहं देवेशस्य करस्य तु ॥
वामहस्ते धनुर्धृत्वा कक्षान्तं तत्करोर्ध्वकम् ।
पूर्णमुष्टिस्तु नाहं स्यान्मध्यादग्रौ क्रमात्कृशौ ॥
अग्रमर्धाङ्गुलव्यासं वृत्तं वर्णैर्विचित्रितम् ।
बाणनाहत्रिभागैकं रज्जुनाहं तु तन्तुना ॥
धनोर्दीर्घाष्टभागे तु सप्तांशं रज्जुदीर्घकम् ।
तद्दीर्घस्यानुकूलं तु धनोर्वक्रमुदाहृतम् ॥
त्रिवक्रसहितं वाथ बालचन्द्राभमेव वा ।
धनुराकृतिरेवं स्यात् दारुजं लोहजं तु वा ॥
कर्तरी परहस्तौ तु टङ्ककृष्णमृगान्वितौ ।
गङ्गं(टङ्कं ?) दक्षिणहस्ते तु वामहस्ते मृगं धृतम् ॥
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ।
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ॥

GSL



त्रिपुरान्तकमूर्तेस्तु प्रथमं लक्षणं त्विदम् ।

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

पुरारिस्थापनं वक्ष्ये तदादौ लक्षणं च वै ।
चतुर्भुजस्त्रिनेत्रश्च जटामकुटसंयुतः ॥
समभाग(भङ्ग ?)युतस्सम्यक् स्थापकेन समन्वितः ।
सव्यकर्णस्थमकरकुण्डलेन समान्वितः ॥
कृष्णापरशुसंयुक्तपरहस्तद्वयान्वितः ।
धनुर्बाणयुतोपेतवामेतरकरान्वितः ॥
परहस्तोज्झितो वाथ द्विहस्तत्रिपुरान्तकः ।
कुर्यात्सलक्षणं वाथ वामभागे तु पार्वतीम् ॥
एवं कृत्वा पुरारिं तु प्रतिष्ठां कारयेत्ततः ।

(उत्तरकामिकागमे एकोनपञ्चाशत्तमपटले ॥)

धनुर्बाणसमायुक्तं कृष्णा परशुधारिणम् ।
उमया सहितं देवं कृत्वा तत्त्रिपुरान्तकम् ॥

(सुप्रभेदागमे चतुस्त्रिंशत्तमपटले ॥)

अथाष्टधा प्रवक्ष्यामि त्रिपुरान्तकमूर्तिनम् ।
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ॥
दक्षिणे पूर्वहस्तं तु नाभिसूत्रावसानके ।
सिंहकर्णं तु तद्धस्तं बाणमध्यनिपीडितम् ॥

GSL



वामहस्ते धनुर्धृत्वा कक्षान्तोर्ध्वं समुद्धृते ।
कर्तरी परहस्तौ द्वौ टङ्ककृष्णमृगस्थितौ(गान्वितौ?)
टङ्कं तु दक्षिणे वामे कृष्णसारङ्गमेव हि ।
जटामकुटसंयुक्तं सर्वाभरणभूषितम् ॥
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ।
इदं प्रथममाख्यातं द्वितीयं तु ततः परम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

चतुर्भुजं त्रिनेत्रं च जटामकुटसंयुतम् ।
सर्वाभरणसंयुक्तं दिव्याम्बरसमायुतम् ॥
पत्रं तु वामकर्णे तु दक्षिणे कुण्डलान्वितम् ।
धनुर्बाणसमायुक्तं कृष्णापरशुसंयुतम् ॥
उपवीतसमायुक्तं सभङ्गस्थानकं कुरु ।
वृषवाहनवच्छेषं कारयेत्तु विचक्षणः

(पूर्वकारणागमे एकादशपटले ॥)

त्रिपुरान्तकमूर्तिः । (२)

तदेव वामपादं तु अपस्मारोपरिस्थितम् ।
शेषं प्रागिव कर्तव्यं द्वितीयं लक्षणं भवेत् ॥

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

GSL



तदेव वामपादं तदपस्मारोपारिस्थितम् ।
शेषं प्रथमतुल्यं हि तृतीयमथ वक्ष्यते ॥

(शिल्परत्ने द्वाविंशपटले ॥)

## त्रिपुरान्तकमूर्तिः । (३)

सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
शेषं प्रागिव कर्तव्यं सूत्रं त्वितरपार्श्वगम् ॥
तृतीयं लक्षणं प्रोक्तं चतुर्थं लक्षणं शृणु ।

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

सुस्थितं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
शेषं प्रागिव कर्तव्यं चतुर्थं तु ततः परम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

## त्रिपुरान्तकमूर्तिः । (४)

तदेव वामपादं तु अपस्मारोपरिस्थितम् ।
प्रागिवैव विशेषं तु चतुर्थं लक्षणं भवेत् ॥

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

तदेव वामपादं तदपस्मारोपरिस्थितम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

GSL



त्रिपुरान्तकमूर्तिः । (५)

तदेव पूर्वहस्तौ द्वौ कटकौ हृदि सीमगौ ।
वामदक्षिणहस्तौ द्वौ क्रमादूर्ध्वमधोमुखम् ॥
बाणमूलधृतं सव्यं वामं बाणाग्रकं धृतम् ।
परे तु दक्षिणे टङ्कं धनुस्तद्वामहस्तके ॥
तद्धस्ते तु मृगं वाथ वामे गौरीसमायुतम् ।
अपस्मारं विना पादं नतं प्रागिव सूलकम् ॥
एवं चतुर्भुजोपेतं मूर्तिं पञ्चविधं भवेत् ।

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

तदेव पूर्वहस्तौ द्वौ कटकौ हृदि सीमगौ ।
वामं दक्षिणकं हस्तं क्रमादूर्ध्वमधोमुखम् ॥
बाणमूलधृतं सव्यं अन्यबाननोद्धृतम् (?) ।
परे दक्षिणके टङ्कं धनुषं वामहस्तके ॥
तद्धस्ते तु मृगं वाथ वामे गौरीसमायुतम् ।
अपस्मारं विना कार्यं पञ्चमं समुदाहृतम् ॥

(शिल्परत्ने द्वाविंशपटले॥)

त्रिपुरान्तकमूर्तिः । (६)

अतिभङ्गनतोपेतमष्टहस्तसमन्वितम् ।
बाणं च परशुं खड्गं वज्रं वै दक्षिणे करे ॥

GSL



धनुषं विस्मयं हस्तं खेटकं कटकं तु वा ।
वामहस्ते समाख्यातं पूर्वसूत्रात्करान्तकम् ॥
यथाशोभनतं तुङ्गं कल्पयेद् गौरिसंयुतम् ।

(अंशुमद्भेदागमे सप्तषष्टपटले ॥)

षष्ठमिष्टं च बाणं च पाशं खड्गं च दक्षिणे ।
धनुषं विस्मयं खेटं कुक्कुटं(कटकं?) वामहस्तके ॥
यथाशोभं तथा कुर्याद्वामे गौरीसमायुतम् ।

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिपुरान्तकमूर्तिः । (७)

षष्ठमं ह्येवमाख्यातं सप्तमं दशदोर्युतम् ।
बाणं चक्रं तथा शूलं टङ्कं वज्रं च दक्षिणे ॥
धनुश्शङ्खं तथा सूची विस्मयं खेटकं तथा ।

(अंशुमद्भेदागमे सप्तषष्टितमपटले ॥)

सप्तमे दक्षिणे बाणं चक्रं शूलं ततः परम् ।
टङ्कं वज्रं तथा वामे धनुषं सूचिविस्मये ॥
खेटान्द्र............सर्वं पूर्ववदाचरेत् ।

(शिल्परत्ने द्वाविंशपटले ॥)

त्रिपुरान्तकमूर्तिः । (८)

तदेव दक्षिणं जानु ततो(तो?)परि निधापयेत् ।
तत्पूर्वे वामपादं तु तलं न्यस्त्वा रथोपरि ॥
रथं तु मुकुळोपेतं मुकुळं रज्जुना वृतम् ।
मुकुळाभ्यन्तरे ब्रह्मा चतुर्वक्त्रश्चतुर्भुजः ॥
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डं कमण्डलुम् ।
कुण्डिका पद्मपाशं च वामहस्तद्वयोद्धृतम् ॥
रथस्य मुकुळाधस्ताद्वृषभं श्वेतवर्णकम् ।
रथं पवनमार्गेण कल्पयेत्कल्पवित्तमः ॥
त्रिपुरान्तकमाख्यातमष्टभेदं द्विजोत्तम ! ।
प्रवालसदृशं वर्णं सत्वराजसमिश्रितम् ॥
सर्वाभरणसंयुक्तमेकवक्त्रं त्रिनेत्रकम् ।
तस्य वामेऽप्युमादेवीं प्रागुक्तविधिना कुरु ॥
सामान्यलक्षणं वर्ण्यं त्रिपुरान्तकमूर्तिनः ।

(अंशुमद्भेदागमे सप्तषष्टपटले ॥)

एवमेवाष्टमं कुर्याद्वसुधोपरि विन्यसेत् ।
दक्षिणाङ्घ्रिस्तथा जानु वामपादतलं पुनः ॥
पुरस्स्थितरथस्योर्ध्वे विन्यसेत्तु यथोचितम् ।
रथं तु मुकुलोपेतं मुकुलं कज्ज(रज्जु?)नावृतम् ॥

GSL

प्रतिमालक्षणानि ।

मुकुलाभ्यन्तरे ब्रह्मा चतुर्वक्त्रश्चतुर्भुजः ।
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डं कमण्डलुम् ॥
कुण्डिकां पद्मपाशं च वामहस्तद्वयोद्धृतम् ।
रथस्य मुकुलाधस्ताद्वृषभं श्वेतवर्णकम् ॥

(शिल्परत्ने द्वाविंशपटले ॥)

शरभेशः ।

शरभेशप्रतिष्ठां तु वक्ष्ये लक्षणपूर्विकाम् ।
पक्ष्याकारं सुवर्णाभं पक्षद्वयसमन्वितम् ॥
ऊर्ध्वपक्षसमायुक्तं रक्तनेत्रद्वयान्वितम् ।
पादैस्सिंहपदाकारैश्चतुर्भिश्च समन्वितम् ॥
सुतीक्ष्णनखसंयुक्तैरूर्ध्वस्थैर्वेदपादकैः ।
दिव्यलाङ्गूलसंयुक्तं सुविकीर्णजटान्विम् ॥
कन्धरोर्ध्वनराकारं दिव्यमौलिसमायुतम् ।
सिंहास्यं भीमदंष्ट्रं च भीमविक्रमसंयुतम् ॥
हरन्तं नरसिंहं तु जगत्संहरणोद्धृतम् ।
कृताञ्जलिपुटोपेतं निश्चेष्टितमहातनुम् ॥
नरदेहं तदूर्ध्वास्यं विष्णुं पद्मदलेक्षणम् ।
पादाभ्यामम्बरस्थाभ्यां कुक्षिस्थाभ्यां च तस्य तु ॥
गगनाभिमुखं देवं कारयेच्छरभेश्वरम् ।

(उत्तरकामिकागमे चतुःपञ्चाशत्तमपटले ॥)

शरभमूर्तिः ।

महामेरुसमाकारमष्टपादं रविप्रभम् ।
द्वात्रिंशद्बाहुसंयुक्तं सूर्यसोमाग्निलोचनम् ॥
दुर्गाकालद्विपक्षं च सुतीक्ष्णघनगर्जितम् ।
ऊर्ध्वकेशं महाबाहुं नानालङ्कारभूषितम् ॥
वज्रमुष्ट्यभयं चक्रं शक्तिं दण्डाङ्कुशौ तथा ।
खड्गखट्वाङ्गपरशूनक्षमालास्थिशूलकम् ॥
धनुश्च मुसलं चाग्निं दधानं दक्षिणैः करैः ।
वरदं पाशहस्तं च गदां बाणध्वजौ तथा ॥
क्रकचं क्रोडशङ्खौ च खेटं नागं च पङ्कजम् ।
कपालं पुस्तकं कुन्तं दुर्गाश्लिष्टकराम्बुजम् ॥
हलं वामे दधानं च भीषणं करपङ्कजैः ।
दंष्ट्रोग्रास्यं महासिंहजटाच्छटनिपीडितम् ॥

(श्रीतत्वनिधौ ॥)

ब्रह्मशिरश्छेत्तृमूर्तिः ।

गौरवर्णं त्रिनेत्रं च जटामौलिविराजितम् ।
ताटङ्कं कुण्डलं सव्यवामश्रुत्योश्च बिभ्रतम् ॥
व्याघ्रचर्माम्बरधरं चतुर्भुजसमन्वितम् ।
वज्रं परशुपूर्वांसं वामे ब्रह्मकरोटिकम् ॥

GSL



अपरे शूलहस्तं च शेषं पूर्वोक्तवत्कुरु ।

(श्रीतत्वनिधौ ॥)

भैरवः ।

अथातो रूपनिर्माणं वक्ष्येऽहं भैरवस्य तु ।
लम्बोदरं तु कर्तव्यं वृत्तपिङ्गललोचनम् ॥

दंष्ट्राकरालवदनं फुल्लनासापुटं तथा ।
कपालम(मा ?)लिनं रौद्रं सर्वतस्सर्पभूषणम् ॥

व्यालेन त्रासयन्तं च देवीं पर्वतनन्दिनीम् ।
सजलाम्बुदसङ्काशं गजचर्मोत्तरच्छदम् ॥

बहुभिर्बाहुभिर्व्याप्तं सर्वायुधविभूषणम् ।
बृहत्सालप्रतीकाशैस्तथा तीक्ष्णनखैश्शुभैः ॥

साचीकृतमिदं रूपं भैरवस्य प्रकीर्तितम् ।

(विष्णुधर्मोत्तरे ॥)

वटुकभैरवः ।

खट्वाङ्गमांसपाशं च शूलं च दधतं करैः ।
डमरुं च कपालं च वरदं भुजगं तथा ॥

आत्मवर्णसमोपेतसारमेयसमन्वितम् ।
ध्यात्वा जपेत्सुसंहृष्टः सर्वान्कामानवाप्नुयात् ॥

(रूपमण्डने ॥)

GSL



विकीर्णलोहितजटं त्रिनेत्रं रक्तविग्रहम् ।
शूलं कपालं पाशं च डमरुं दधतं करैः ॥
नानारूपैः पिशाचैश्च नानारूपगणैर्वृतम् ।
श्वानारूढं च निर्वाणं वटुकं भैरवं भजे ॥

(वटुकभैरवकल्पे ॥)

स्वर्णाकर्षणभैरवः ।

पीतवर्णं चतुर्बाहुं त्रिनेत्रं पीतवाससम् ।
अक्षय्यस्वर्णमाणिक्यगणपूरितपात्रकम् ॥
अंसाहितमहाशूलचामरं तोमरोद्वहम् ।
सन्ततं चिन्तयेद्भक्त्या भैरवं सर्वसिद्धिदम् ॥
नानाभरणशोभाढ्यमानन्दसुखरूपिणम् ।
मदोन्मत्तं सदानन्दं सर्वदेवनमस्कृतम् ॥
एवं ध्यायेच्च मन्त्रज्ञः स्वर्णाकर्षणभैरवम् ।

(श्रीतत्वनिधौ ॥)

अष्टाष्टभैरवाः ।

इतः परं प्रवक्ष्यामि शृणु राजन्नशेषतः ।
अष्टाष्टकमिदं पुण्यं भैरवाणामभीष्टदम् ॥
पूर्ववद्वर्णतो ध्याने ध्येयं सर्वैः पृथक्पृथक् ।

## प्रथमाष्टकम् ।

आद्याष्टकं सुवर्णाभं त्रिशूलं डमरुं तथा ॥
पाशं चासिं दधानं च ध्यायेत्सर्वाङ्गसुन्दरम् ।

## द्वितीयाष्टकम् ।

अथ द्वितीयकं ध्यायेदक्षमालामथाङ्कुशम् ।
दधानं पुस्तकं वीणां सुखेतमणिभूषणम् ॥

## तृतीयाष्टकम् ।

ज्वालां शक्तिं गदां कुन्तं दधानं नीलवर्णकम् ।
ध्यायेत्तृतीयं शुभदमष्टकं शुभलक्षणम् ॥

## चतुर्थाष्टकम् ।

खड्गं खेटं पट्टसं च दधानं परशुं तथा ।
धूम्रवर्णमभिप्रेतं ध्यायेदष्टकमादरात् ॥

## पञ्चमाष्टकम् ।

कुन्तं खेटं च परिघं भिण्डिपालं तथैव च ।
पञ्चमाष्टकमेतद्धि श्वेतं स्यात्सुमनोहरम् ॥

## षष्ठसप्तमाष्टमाष्टकानि ।

पीतष्षष्ठमृषीरक्तमष्टमं च तटित्प्रभम् ।
पञ्चमाष्टकमेतद्धि श्वेतं स्यात्सुमनोहरम् ॥
कुन्तादिकं समं प्रोक्तं षडारभ्याष्टमान्तकम् ।

GSL



## अष्टाष्टभैरवनामानि ।

असिताङ्गो विशालाक्षो मार्तण्डो मोदकप्रियः ।
स्वच्छन्दो विघ्नसंतुष्टः खेचरः सचराचरः ॥

रुरुश्च क्रोडदंष्ट्रश्च तथैव च जटाधरः ।
विश्वरूपो विरूपाक्षो नानारूपधरः परः ॥

वज्रहस्तो महाकायश्चण्डश्च प्रलयान्तकः ।
भूमिकम्पो नीलकण्ठो विष्णुश्च कुलपालकः ॥

मुण्डपालः कामपालः क्रोधो वै पिङ्गलेक्षणः ।
अभ्ररूपो धरापालः कुटिलो मन्त्रनायकः ॥

रुद्रः पितामहाख्यश्चाप्युन्मत्तो वटुनायकः ।
शङ्करो भूतवेतालस्त्रिणेत्रस्त्रिपुरान्तकः ॥

वरदः पर्वतावासः कपालः शशिभूषणः ।
हस्तिचर्माम्बरधरो योगीशो ब्रह्मराक्षसः ॥

सर्वज्ञः सर्वदेवेशः सर्वभूतहृदिस्थितः ।
भीषणाख्यो भयहरः सर्वज्ञाख्यस्तथैव च ॥

कालाग्निश्च महारौद्रो दक्षिणो मुखरोऽस्थिरः ।
संहारश्चातिरिक्ताङ्गः कालाग्निश्च प्रियङ्करः ॥

घोरनादो विशालाक्षो योगीशो दक्षसंस्थितः ।

(श्रीतत्वनिधौ)

GSL



## वीरभद्रमूर्तिः ।

चतुर्भुजं त्रिणेत्रं च जटामकुटसंयुतम् ।
दक्षिणे खड्गबाणौ च बामे चापं गदां धरम् ॥
दंष्ट्राकरालवदनं भीमं भैरवगर्जितम् ।
रुण्डमालासमायुक्तं पादुकोपरिसुस्थितम् ॥
भद्रकालीसमायुक्तं करालं हृदि विन्यसेत् ।

## दक्षब्रह्मस्वरूपम् ।

वीरस्य दक्षभागे तु दक्षब्रह्माणमास्थितम् ।
अजवक्त्रं द्विनयनं शृङ्गद्वयविभूषितम् ॥
नमस्काराञ्जलिं विप्रं शिवध्यानपरायणम् ।
(श्रीतत्वनिधौ ॥)

अथ वक्ष्ये विशेषेण वीरभद्रेश्वरं शृणु ।
महापातकदोषघ्नं सर्वपीडानिवारणम् ॥
वीरभद्रमिति ख्यातं दक्षयज्ञहरं परम् ।
चतुर्भुजं त्रिणेत्रं च ज्वालाकेशं सुदंष्ट्रिणम् ॥
घण्टामालाधरं घोरं शिरोमालाविभूषितम् ।
वृश्चिकाभरणं चैव नागयज्ञोपवीतिनम् ॥
नूपुरं विमलं तद्वत्पादौ पादुकभूषितौ ।
नीलकण्ठं च त्र्यक्षं च ऊरुकञ्चुकसंयुतम् ॥

खङ्गखेटधनुर्बाणं कपालं भिण्डिपालकम् ।
रक्तवर्णसमायुक्तमुग्रदृष्टिभयङ्करम् ॥
एवं ध्यात्वा विशेषेण प्रतिष्ठां कारयेत्ततः ।

(उत्तरकारणागमे ॥)

जलन्धरहरमूर्तिः ।

रक्ताभमुग्रनयनं द्विभुजं च त्रिनेत्रकम् ।
उपवीतसमायुक्तं सर्वालङ्कारशोभितम् ॥
पादयोः पादुकायुक्तं किञ्चिद्धै गमनोन्मुखम् ।
दक्षहस्ते स्थितं छत्रं वामे पूर्णकमण्डलुम् ॥
सुविकीर्णजटाभारं गङ्गाचन्द्रसमन्वितम् ।
कर्णकुण्डलसंयुक्तं हारनूपुरसंयुतम् ॥
द्विभुजं च त्रिनेत्रं च किरीटकटकान्वितम् ।
सर्वालङ्कारसंयुक्तं कक्षे खङ्गसमन्वितम् ॥
कृताञ्जलिपुटोपेतहस्ते चक्रं दधं परम् ।
जलन्धरमथ प्रोक्तम् ॥

(श्रीतत्वनिधौ ॥)

मल्लारिशिवः ।

मकुटमणिमयूखप्रोज्झिताशेषरत्नं
विमलशशिकलाङ्कं सुन्दरेन्दीवराक्षम् ।

अनुकृतशशितेजःकुण्डलं चारुहासं
प्रकटदशनशोभानिर्जितानेकहीरम् ॥
अभिनवमणिमुक्ताहारचाम्पेयमाला-
विविधकुसुमगुच्छैः शोभिवक्षस्स्थलाढ्यम् ।
सफणपवनभुग्दोर्दण्डभूषाभिरामं
करडमरुनिनादैः पूरितद्योखगर्भम् ॥
त्रिभुवनभवनेशं पीतकौशेयवासं
दनुजदहनदक्षं प्रस्फुरत्खड्गहस्तम् ।
भुजगफणसुगुप्तैर्भूषणैर्न्यस्तभूषं
प्रणतसुरकिरीटव्याप्तपादारविन्दम् ॥
सितहयवरपत्रं हारसंभूषिताङ्गं
परिवृतमतिघोरैः सप्तभिस्सारमेयैः ।
कनकगिरिसमाभं नैशचूर्णाभिरामं
सकलनिगमगुह्यं नौमि मल्लारिदेवम् ॥

(मल्लारिमाहात्म्ये ॥)

अष्टभुजाघोरमूर्तिः ।

अथ वक्ष्ये विशेषेण सर्वलोकैकपावनम् ।
सर्वयुद्धजयं चैव ब्रह्महत्यादिनाशनम् ॥

GSL



महापातकदोषघ्नं गुरुद्रोहनिवारणम् ।
शिवद्रव्यापहारं च उपपातकनाशनम् ॥
सर्वैश्वर्याभिवृद्ध्यर्थं परमोक्षनिरासनम् ।
अघोरास्त्रेश्वरं भीमं स्थापनं वक्ष्यते शृणु ॥
त्रिनेत्राष्टभुजं भीममुग्रदंष्ट्राकरालकम् ।
कालमेघसमं घोरं रक्तवस्त्रसमन्वितम् ॥
ज्वालाकेशसमायुक्तं कृशानुनयनैर्युतम् ।
अर्धचन्द्राकृतिं भस्म ललाटोपरिशोभितम् ॥
भुजाभ्यां त्रिशिखा तिर्यक् वेतालं खड्गमेव च ।
डमरुं च कपालं च खेटकं खड्गमेव च ॥
रक्तवस्त्राम्बरोपेतं रक्तपुष्पसमन्वितम् ।
रक्ताभरणसंयुक्तं खड्गमालाविभूषितम् ॥
शिरोमालाविभूष्यं च नागयज्ञोपवीतिनम् ।
वृश्चिकाभरणं कण्ठे कालाग्निसदृशप्रभम् ॥
एवं ध्यात्वा महाघोरं द्वात्रिंशल्लक्षणान्वितम् ।
पद्मपीठोपरिस्थं च समीपे वृषभं तथा ॥
एवं संकल्प्य विधिवत् प्रतिष्ठां कारयेत्ततः ।

(उत्तरकारणागमे ॥)

GSL



द्वात्रिंशद्भुजाघोरमूर्तिः ।

एकवक्त्रं सदानन्दं द्वात्रिंशद्भुजसंयुतम् ।
जटामकुटसंयुक्तं त्रिनेत्रं चन्द्रशेखरम् ॥
अभयं खड्गशूलं च चक्रं डमरुकं तथा ।
दधानमस्थिबाणौ च गदां पद्मं कपालकम् ॥
ज्ञानमुद्रां कुन्तहस्तमङ्कुशं चाक्षमालिकाम् ।
खट्वाङ्गं परशुं चैव दधानं दक्षिणैः करैः ॥
वरं च फलकं चैव टङ्कं पाशं च मुद्गरम् ।
नागमग्निं मृगं घण्टां धनुश्च कटिहस्तकम् ॥
रत्नं च कुमुदं कुम्भं मुसलं पुस्तकं तथा ।
एतदायुधसंयुक्तं रुण्डमालाविभूषितम् ॥
कालमुण्डस्य शिरसि स्थितं सर्वाभयप्रदम् ।

(शिवतत्वरत्नाकरे ॥)

दशभुजाघोरमूर्तिः ।

परशुं डमरुं खड्गखेटौ बाणशरासने ।
शूलं कपालमभयवरौ दधतमिष्टदम् ॥
त्रिलोचनं भीषणास्यं नीलाङ्गं रक्तवाससम् ।
अहिभूषि[त*]सर्वाङ्गं तमघोरमुपास्महे ॥

(पाञ्चरात्रे ॥)

महाकालो घनश्यामः काल्यालिङ्गितविग्रहः ।
श्यामकञ्चुकधारी च मदारुणविलोचनः ॥
ब्रह्माण्डचषके पूर्णं पिबन्विश्वरसासवम् ।
महाकालीं घनश्यामामनङ्गार्द्रामपाङ्गयन् ॥
सिंहासने समासीनः कल्याणकलनात्मके ।
कालमृत्युमुखैर्युक्तस्सर्वलोकैकभक्षकः ॥
ललिताध्यानसंपन्नो ललितापूजनोत्सुकः ।
वितन्वन्ललिताभक्तेष्वायुषो दीर्घदीर्घताम् ॥

(ललितोपाख्याने ॥)

---

अनुग्रहमूर्तयः।

MINISTRY OF CULTURE • GOVERNMENT OF INDIA

CSL

GSL

# अनुग्रहमूर्तयः ।

चण्डेशानुग्रहमूर्तिः ।

अथ वक्ष्ये विशेषेण चण्डेशानुग्रहं परम् ।
उमासहितवत्सर्वं वामे किंचिन्नताननम् ॥

दक्षिणे त्वभयं वर्ज्य तद्धस्तं वरदं भवेत् ।
वामे तु कटकं वर्ज्य तं न्यस्त्वा चण्डमूर्धनि ॥

हृदयेऽञ्जलिसंयुक्तश्चण्डेशो भक्तिसंयुतः ।
आसीनः पद्मपीठे तु चण्डेशस्स्वर्णसन्निभः ॥

देवीदेवेशयोर्मध्ये स्कन्दमूर्तिं विना बुधाः! ।
चण्डेशानुग्रहं ख्यातं दक्षिणामूर्तिरुच्यते ॥

(अंशुमद्भेदागमे पञ्चसप्ततितमपटले ॥)

उमया सहितस्याथ चन्द्रशेखरमूर्तिनः ।
वामे वा दक्षिणे वापि कारयेद्देशिकोत्तमः ॥

एवं(देवं ?) जानूरुनाभ्यन्तस्तनवक्षोगलास्यगम् ।
सुखासीनं स्थितं वापि कृताञ्जलिपुटान्वितम् ॥



14